नमः सर्वेश्वराय भगवते श्रीरामाय

卐 आनन्दभाष्यकारश्रीरामानन्दाचार्याय नमः 卐

श्रीमद्भगवद्रामानन्दाचार्यकृतानन्दभाष्यभूषिता

श्वेताश्वतरोपनिषत्

ॐ ब्रह्मवादिनो वदन्ति ।

किं कारणं ब्रह्म कुतः स्म जाता जीवाम केन क्व च सम्प्रतिष्ठाः ।
अधिष्ठिताः केन सुखेतरेषु वर्त्तामहे ब्रह्मविदो व्यवस्थाम् ॥१॥

राम एव परं ब्रह्म राम एव परं तपः । राम एव परं तत्त्वं श्रीरामो ब्रह्म तारकम् ॥१॥
संहारवृत्तिकतया प्रथितो हरोऽपि गृह्णद्यदम्बुशिरसाशिवसंज्ञितोऽभूत् ।
सर्वातिशायिमृदुतादिगुणावलम्बः सोऽन्तःस्फुरत्वविरतं मम राघवाङ्घ्रिः ॥२॥
स्तुतः परशुरामेण सुरैश्च पद्मजादिभिः । अगस्त्यादिमुनीन्द्रैर्यो रामं ब्रह्म नमामि तम् ।३।
सूत्रवृत्तिकृतौ नत्वा व्यासबोधायनौमुनी । श्रीमन्तं राघवानन्दाचार्यं गुरुं नमाम्यहम् ।४॥
कुर्वे गुरुं नमस्कृत्य ज्ञानभक्तिदयानिधिम् । श्वेताश्वतरोपनिषदोभाष्यमानन्दसंज्ञकम्५।
श्रीमद्रामसमारम्भां शुकबोधायनान्विताम् । राघवानन्दगुर्वन्तां वन्दे गुरुपरम्पराम्।६॥

'यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति, यत्प्रयन्त्यभिसंविशन्ति तद्विजिज्ञासस्व तद् ब्रह्म' इति श्रुतिप्रमाणितं किमिति निर्धारणाय प्रवृत्तेयं श्वेताश्वतराणां मन्त्रोपनिषत् । ब्रह्मवादिनो वदन्तीत्याख्यायिका विद्यास्तुतिप्रयोजनवती । ब्रह्मवदन्तीत्येवंशीला ब्रह्मवादिनो मुनयो वक्ष्यमाणरूपेण वदन्तिस्म । मीमांसन्त इत्यर्थः । कथं वदन्तिस्मेति वदनप्रकाराकाङ्क्षायामाह—किमिति । हे ब्रह्मविदः ! किं कारणं ब्रह्म ? 'यतोवे'ति–श्रुतौ जगत्कारणतयाऽभिहितं ब्रह्म किं देवतात्मकमस्ति ? जगत्कारणं ब्रह्मादिषु देवेष्वन्तर्भूतमनन्तर्भूतं वाऽस्तीत्यर्थः कुतः स्म जाता ? वयं कस्माद् ब्रह्मणो जाताः ? जीवाम केन ? अस्माकं स्थितिश्च किंप्रयुक्ता ? क्व च सम्प्रतिष्ठा ? सम्प्रतिष्ठाशब्दाभिहितोस्माकं लयश्च कुत्र ? अथ स्वप्रवृत्तिकारणमपि मीमांसन्ते–अधिष्ठिता इति । केन वा ब्रह्माख्येन देवेनाधिष्ठिता नियमिता वयं सुखेतरेषु प्राक्तनकर्मफलहेतुभूतेषु दुःखात्मकेषु जन्मसु व्यवस्थांविशिष्टामवस्थामनुसरन्तो वर्त्तामहे १॥

कालः स्वभावो नियतिर्यदृच्छा भूतानि योनिः पुरुष इति चिन्त्यम् ।
संयोग एषा न त्वात्मभावादात्माऽप्यनीशः सुखदुःखहेतोः ॥२॥
ते ध्यानयोगानुगता अपश्यन् देवात्मशक्ति स्वगुणैर्निरूढाम् ।
यः कारणानि निखिलानि तानि कालात्मयुक्तान्यधितिष्ठत्येकः ॥३॥

अथ कालस्वभावादीनां जगत्कारणतां निरस्यति—काल इति । कालविदः कालः, लोकायतिकाः, स्वभावः मीमांसका नियतिरूपं कर्म, केचिद् भूतानि, सांख्या योनिपदवाच्या प्रकृतिः, केचित् पुरुषो जगत्कारणमिति वदन्ति । तच्चिन्त्यं विकल्पासहत्वात् । तथा हि—किमुक्तेषु चेतनाचेतनेषु पदार्थेषु प्रत्येकं जगत्कारणमुतैतेषां संयोगः ! नाद्योऽसम्भवात् । नापि द्वितीयः संयोजकाभावात् । तदाह–तु शब्द एवार्थकः । आत्मसद्भावादेषां संयोगो नैव कुतः ? यतः सुखदुःखहेतोरनीश आत्मा । आत्मा चेन्नानीशः सुखभोक्तैव स स्यात् । नैवमस्ति लोके तस्य दुःखभोक्तृत्वस्यापि प्रत्यक्षमीक्ष्यमाणत्वात् । सुखदुःखभोक्तृत्वेनानीशत्वादेवात्मा जगत्काणमपि न । एतेन कालादयोऽचेतनाश्चेतनो जीवश्च न जगत्कारणमित्युक्तं भवति ॥२॥

उक्तेन प्रकारेण कालादीनां जगत्कारणत्वं प्रतिक्षिप्तमतस्तेभ्योऽतिरिक्तस्तेषां प्रेरकः सर्वेश्वरः कश्चिदस्ति जगत्कारणमित्यभिधत्ते त इति । ध्यानयोगानुगता ध्यानमेव योगस्तमनुगता युक्तास्ते मुनयः स्वगुणैः स्वस्य प्रकृतेर्गुणः सत्वरजस्तमांसि तैर्निरूढां समन्विताम् । स्वपदेनैषां गुणानां परमात्मगुणत्वाभावः सूचितः । प्रकृतेर्गुणानाञ्च भेदप्रदर्शनाद् गुणसमूहस्य प्रकृतित्वाङ्गीकर्तृणां सांख्यानां निरासोऽपि वेदितव्यः । देवात्मशक्तिं देवात्मनः 'लोलवत्तुलीलाकैवल्यम्' इत्येवं प्रदर्शितस्य परब्रह्मणो भगवतः श्रीरामस्य शक्ति जगदात्मककार्योपयिकापृथक्सिद्धविशेषणतया शक्तिपदेनोदीरिताम् । द्रव्यत्वसत्त्वेऽपि ब्रह्मणो जगत्कारणत्वनिर्वाहकत्वेन शक्तितयाऽभिहितामित्यर्थः । प्रकृतिमपश्यन्नवालोकन्त । परब्रह्मणो भगवतः श्रीरामस्य देवत्वमामनन्ति कतिचिच्छ्रुतिस्मृतयः तथाहि—''अरं दासो न मीढुसे कराण्यहं देवाय भूर्णयेऽनागाः । अचेत यदचिता देवो अर्योगृत्स राये कवितरो जुनाति ॥'' (ऋग्वेदः) ''यो ब्रह्मा विष्णुर्महेश्वरो यः सर्वदेवात्मा'' (रामोत्तरताप०) ''इत्येतैर्ब्रह्मा सप्तचत्वारिंशन्मन्त्रैर्नित्यं देवं स्तौति । ततो स्तुतो देवः प्रीतो भवति । स्वात्मानं दर्शयति । तस्माद् य एतैर्मन्त्रैर्नित्यं देवं स्तौति स देवं पश्यति । सोऽमृतत्वं गच्छति । सोऽमृतत्वं गच्छति । (श्रीरामतापनीयोपनिषत्)

"ततः सहस्ताभरणान् प्रगृह्य विपुलान् भुजान् । अब्रुवंस्त्रिदशश्रेष्ठा राघवं प्राञ्जलिं स्थितम्
कर्ता सर्वस्य लोकस्य श्रेष्ठो ज्ञानविदां विभुः । उपेक्षसे कथं सीतां पतन्तीं हव्यवाहने ।
कथं देवगणश्रेष्ठमात्मानं नावबुध्यसे ॥६॥" (वाल्मीकि रा० यु०)

"इति ब्रुवाणं काकुत्स्थं ब्रह्मा ब्रह्मविदां वरः।अब्रवीच्छृणु मे वाक्यं सत्यंसत्यपराक्रमः१२
भवान् नारायणो देव ... ...सीतालक्ष्मीर्भवान् विष्णुर्देवः कृष्णः प्रजापतिः ॥२७॥"
अमोघं देव ते वीर्यं न तेऽमोघाः पराक्रमाः ॥२९॥"

अमोघं दर्शनं राम अमोघस्तव संस्तवः । अमोघास्ते भविष्यन्ति भक्तिमन्तो नरा भुवि३०
ये त्वां देवं ध्रुवं भक्ताः पुराणं पुरुषोत्तमम् । प्राप्नुवन्ति तथा कामानिह लोके परत्र च
(वाल्मीकि रा० यु० ६।११७)

सनत्कुमारसंहितास्थे श्रीरामस्तवराजेऽपि—
"रामं रघुवरं वीरं धनुर्वेदविशारदम् । मङ्गलायतनं देवं रामं राजीवलोचनम् ॥२०॥"
"श्रीरामचन्द्रं हरिमादिदेवं परात्परं राममहं भजामि ॥२५॥"
"नमोऽस्तु वासुदेवाय ज्योतिषां पतये नमः । नमोऽस्तु रामदेवाय जगदानन्दरूपिणे५०

"वरं वरेण्यं वरदं तु काव्यं सन्तारयत्याशु च सर्वलोकम् ।
सङ्कल्पितार्थप्रदमादिकाव्यं श्रुत्वा च रामस्य पदं प्रयाति ॥२८॥
ब्रह्मेशविष्ण्वाख्यशरीरभेदैर्विश्वं सृजत्यत्ति च पाति यश्च ।
तमादिदेवं परमं वरेण्यमाधाय चेतस्युपयाति मुक्तिम् ॥२९॥"
(स्कन्दपुराणरामायणमाहात्म्ये)

आचार्यवर्यैर्भगवत्पादश्रीराघवानन्दाचार्यैरप्यभिहितम्—
"अशरण्यशरण्याय देवदेवाय वेधसे । व्यक्तषाड्गुण्यचेष्टाय राघवेन्द्राय मङ्गलम् ।५९
(श्रीराघवेन्द्रमङ्गलमाला)

प्रकृतिलक्षणायां शक्तावङ्गीकृतायां तद्द्वारकमेव जगदुपादानकारणत्वं परब्रह्मणो भगवतः श्रीरामचन्द्रस्यातो न तस्य घटोपादानकारणस्य मृत्पिण्डस्येव विकारित्वप्रसङ्ग इति ध्येयम् । उक्तञ्चैवमेव परिणामविमर्शे भगवद्भिः श्रीद्वारानन्दाचार्यैः—
"उपादानं निमित्तं च जगतो राघवो मतः । श्रुतयो निर्विकारत्वं वदन्ति ब्रह्मणो ननु
व्याकुप्येयुर्हि ताश्चैवं कुतश्चेदुच्यते यतः । विकारीति मतं सर्वैरुपादानं विचक्षणैः ३।
इति चेदुच्यते ह्यत्र नैवं वाच्यं कुतो यतः । प्रतिज्ञातं श्रुतौ सर्वज्ञानमेकस्य ज्ञानतः ।४॥
दृष्टान्तः कथितश्चापि मृत्कार्याणां मृदस्तथा। उपादानं घटादेर्हि मृत्तिका परिकीर्त्तिता५

तमेकनेमिं त्रिवृतं षोडशान्तं शतार्धारं विंशतिप्रत्यराभिः ।
अष्टकैः षड्भिर्विश्वरूपैकपाशं त्रिमार्गभेदं द्विनिमित्तैकमोहम् ॥४॥

परिणता यतो मृद्धि घटादिरूपतः खलु । उपादानस्य विज्ञानादुपादेयावबोधतः ॥६॥
मृज्ज्ञानेन घटादीनां विज्ञानं सम्मतं तथा । एकस्य ब्रह्मणो ज्ञानाद् विज्ञानं जगतस्तथा।
उपादानं यतो ब्रह्म जगतोऽस्य मतं बुधैः । परिणतं यतो ब्रह्म जगद्रूपेण सम्मतम् ।८॥
व्यासेन'प्रकृतिश्चे'त्यादिकं हि सूत्रितं ततः । श्रीबोधायनवृत्तौ तद् व्याख्यातमेव मेव च
ब्रह्मणः परिणामो हि प्रकारद्वारको जगत् । विकारित्वं ततो द्वारे प्रकृतिपुरुषद्वये ॥१०॥
स्वरूपे च स्वभावे च विकारः प्रकृतेः खलु । स्वभाव एव जीवस्य विकारः स्वीकृतो बुधैः
ब्रह्मणस्तु विकारो यन्न स्वरूपस्वभावयोः । व्याकोपावसरः कश्चिच्छ्रुतीनां वर्त्तते न तत्"

अत एवोक्तं श्रीश्रुतानन्दाचार्यैः श्रौतसिद्धान्तविन्दुप्रबन्धे
"त्रिधाऽपि श्रुतौ सर्ववित् सर्वशक्ति र्जगत्कारणं जानकीनाथ एव ।
ततः कापिलं गौतमीयञ्च शैवं च शाक्तं तथान्यन्मतं नानवद्यम् ॥७॥
विकारञ्च रामो दयाब्धिस्तथात्वे दयाशून्यतां पक्षपातं च नैति ।
प्रकारे विकारस्तथा चित्रसृष्टौ च हेतुर्यतः प्राणिनां प्राच्यकर्म।७॥" इति ।

प्रकृतिलक्षणशक्त्यवलोकनानन्तरं तादृशशक्तिशरीरकं कालाद्यखिलकारणाधिष्ठितारं परमात्मानमध्यपश्यन्नित्यभिधत्ते—य इति । यानि कालात्मयुक्तानि कालादारभ्यात्मान्तानि यानि कारणानीतः प्रागुक्तानि तानिनिखिलानि यश्चैकोऽधितिष्ठत्यधीष्टे तं सर्वकारणनियन्तारं परमात्मानं श्रीराममध्यपश्यन्नित्यर्थः ।

"राम एव परं ब्रह्म राम एव परं तपः ।राम एव परं तत्त्वं श्रीरामो ब्रह्मतारकम्" इतिश्रुतेः ३

अथ चित्तावतारसौकर्यार्थं तच्छक्तितया निर्दिष्टां प्रकृतिं चक्रतया निरूपयति—तमिति । तं परमात्मानमेका प्रकृतिपदाभिधेयानेमिर्यस्य स एकनेमिस्तमेकनेमिं प्रकृत्याख्यनेमिविशिष्टं त्रिवृत्तं त्रिभिःसत्वरजस्तमोभिर्गुणैर्वृत्तं षोडशान्तंषोडशसंख्याका अन्ता विकारा यस्य स यद्वा प्राणादारभ्य नामपर्यन्तायाः षोडशकलास्तासामन्तोऽवसानं यस्मिन् स षोडशान्तस्तं शतार्धारंशतस्यार्धमकारादिपञ्चाशद्वर्णात्मका अरा नाभिनेमिमध्यस्थकाष्ठविशेषा यस्य तं पञ्चाशत्संख्याकवर्णात्मकाराविशिष्टं विंशतिप्रत्यराभिः । अत्र प्रत्यराभिरिति लिङ्गविपर्ययश्छान्दसो ज्ञेयः । तथा च द्वादशमासषड्ऋत्वयनद्वयात्मकैर्विंशतिसंख्याकैःप्रत्यरैरराणां दाढर्यार्थं निहितैस्तन्मध्यस्थैःकाष्ठविशेषै श्चविशिष्टमित्यर्थः।

पञ्चस्रोतोम्बुं पञ्चयोन्युग्रवक्त्रां पञ्चप्राणोर्मिं पञ्चबुद्ध्यादिमूलाम् ।
पञ्चावर्त्तां पञ्चदुःखौघवेगां पञ्चाशद्भेदां पञ्चपर्वामधीमः ।।५।।

षड्भिरष्टकैरुपेतम् । तत्रादिमष्टकमणिमाद्यैश्वर्याष्टकम् । प्राच्यादिदिगष्टकमिन्द्रादिदिक्पालाष्टकं वा द्वितीयम् । भूमिरापोऽनलो वायुः खं मनोबुद्धिरेव च । अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा ।।" (गीता ७।४) इति गीतोक्तं प्रकृत्यष्टकं तृतीयम् । "ब्रह्मा प्रजापतिर्देवा गन्धर्वा यक्षराक्षसा । पितरश्च पिशाचाश्च" इति देवाष्टकम् "अष्टौ वसव" इति वस्वष्टकं वा चतुर्थम् । दयाक्षान्त्यनसूयाशौचानायासमङ्गलाकार्पण्यास्पृहेत्यात्मगुणाष्टकं पञ्चमम् । अपहतपाप्मत्वादिब्रह्मगुणाष्टकं षष्ठम् । एभिः षट्संख्याकैरष्टकैरन्वितम् । विश्वरूपैकपाशं विश्वरूपः स्वाश्रितजगदचलत्वकारणत्वेन बन्धकपाश इव विराट् पुरुष एव एको मुख्यः पाशो यस्य तम्[*] । त्रिमार्गभेदम् । त्रयो देवयानपितृयाणक्षुद्रजन्तुभवनात्मकास्त्रिसंख्याकामार्गभेदा यस्य स तम् । द्विनिमित्तैकमोहम् । पितृयाणक्षुद्रजन्तुभवनरूपमार्गद्वयस्य निमित्तं हेतूभूतो देहात्मैक्याभिमानात्मक एको मोहो यस्मात्तमपश्यन्निति पूर्वेण सम्बन्धः ।।४।।

अथ चक्रतया निरूपितां प्रकृतिं वैराग्यजननाय नदीत्वेनोपवर्णयति—पञ्चस्रोतोम्बुमिति । पञ्चसंख्याकानि स्रोतोम्बूनि स्रोतस्तयाऽविच्छेदेन प्रवर्त्तमानानि तमोऽक्षराव्यक्तमहदहङ्कारात्मकान्येवाम्बूनिःयस्याः सा पञ्चस्रोतोम्बुः ताम् । पञ्चयोन्युग्रवक्त्रामाकाशादिपञ्चमहाभूतोपादानकारणतया योन्यात्मकानि पञ्च पञ्चसंख्याकानि शब्दादितन्मात्राण्येव उग्राणि भीषणानि वक्तृणि मुखानि यस्याः सा तथोक्ता ताम् । पञ्चप्राणोर्मिं पञ्चसंख्याकाः प्राणापानादय एवोर्मयस्तरङ्गा यस्याः सा तथोक्ता ताम् । पञ्चबुद्ध्यादिमूलां बुद्धेर्ज्ञानस्यादीनि ज्ञानेन्द्रियाणि । पञ्च बुद्ध्यादीनि मूलं यस्याः सा पञ्चबुद्ध्यादि मूलाताम् पञ्चावर्त्तां पञ्च कर्मेन्द्रियाण्येव आवर्त्ता सा तथोक्ता ताम् ।पञ्चदुःखौघवेगां पञ्च पञ्चसंख्याकानि गर्भजन्मव्याधिजरामरणाणि प्रतिकूलतया वेदनीयानि पञ्चमहाभूतान्येव वा दुखानि ओघस्य वेगो यस्याः सा पञ्चदुखौघवेगा ताम् । पञ्चाशद्भेदां पञ्चाशद्वर्णात्मकाभेदा यस्याः सा पञ्चाशद्भेदा ताम् पञ्चपर्वां पञ्च पञ्चसंख्याकानि पर्वाणितमोमोहमहामोहतामिस्रात्मकपर्वाणि यस्याः सा पञ्चपर्वा तां नदीमिति शेषः । ब्रह्मात्मकनदीरूपां प्रकृतिं तदधिष्ठातारं सर्वेश्वरं भगवन्तं श्रीरामञ्च वयमधीमः स्मरामः ।।५।।

---

[*] विराट्पुरुषात्मकब्रह्मचक्रपाशरूपमित्यर्थः ।

सर्वाजीवे सर्वसंस्थे बृहन्ते अस्मिन् हंसो भ्राम्यते ब्रह्मचक्रे ।
पृथगात्मानं प्रेरितारं च मत्वा जुष्टस्ततस्तेनामृतत्वमेति ॥६॥
उद्गीतमेतत् परमं तु ब्रह्म तस्मिंस्त्रयं स्वप्रतिष्ठाक्षरं च ।
अत्रान्तरं वेदविदोविदित्वा लीना ब्रह्मणि तत्परा योनिमुक्ताः७।

अथ 'जीवाम केन ?' 'क्व च सम्प्रतिष्ठा ?' अधिष्ठिताताः केन सुखेतरेषु व्यवस्थां वर्त्तामहे ?' इति प्रश्नत्रयस्योत्तरमाह—सर्वाजीव इति । सर्वानाजीवयतीति सर्वाजीवंतस्मिन् सर्वाजीवे सर्वाजीवनकर्त्तरि * सर्वेषां संस्थाप्रलयो यस्मिंन्नुस्तत् सर्वसंस्थं तस्मिन् सर्वसंस्थे × सर्वलयस्थानभूते । कुतस्तस्य सर्वसंस्थत्वं युक्तमित्याशङ्कायामाह—बृहन्त इति । निरतिशयबृहत्वशालिनीत्यर्थः, तस्मिन् ब्रह्मचक्रे ब्रह्मात्मके चक्रे हंसो गमनशीलो जीवो भ्राम्यते । ब्रह्मचक्रेण भ्राम्यमाणो भवतीत्यर्थः + । अत्र "भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया ।" इति भगवदुक्तिरनुसन्धेया । अथैतादृशस्य ज्ञानस्य फलमभिधत्ते—पृथगात्मानमिति । एवं प्रेरितारं स्वनियन्तृतया परमात्मानमात्मानंपरमात्मनियम्यतया तच्छरीरभूतं स्वात्मानश्च पृथङ् मत्वा विज्ञाय ततस्तेन निरुक्तज्ञानप्रीतेन ब्रह्मणा भगवता श्रीरामेण जुष्टः प्रीतः (प्रीतिविषयीकृतः स नित्यर्थः) सन्नमृतत्वंमोक्षमेत्यवाप्नोति । एतेन नियाम्यनियन्तृरूपजीवेश्वरभेदविषयकस्य ज्ञानस्य मोक्षहेतुत्वाभिधानेन जीवेश्वरभेदस्यापारमार्थ्यं वदन्तो निरस्ता वेदितव्या अपरमार्थविषयकस्य ज्ञानस्य मोक्षहेतुत्वासम्भवात् । ईर्धातोराधृषादिगणवृत्तित्वात् प्रेरितारमिति णिज्विकल्पः ।६॥

चक्ररूपेण प्रागभिहितस्यैव परमतां सर्वाधारतां स्वमहिमप्रतिष्ठितताम्क्षरताश्चाभिधत्ते—उद्गीतमिति । उद्गीतमेतच्चक्ररूपेण प्रागभिहितम् । एवार्थकस्तुः । परमं सर्वत उत्कृष्टं ब्रह्म । स्वप्रतिष्ठेति स्त्रीत्वं छान्दसम् । तथा च स्वस्मिन्नात्मीय महिम्नि प्रतिष्ठा यस्य तत् स्वप्रतिष्ठमक्षरमिति "रमन्ते योगिनोऽनन्ते नित्यानन्दे चिदात्मनि । इति रामपदेनासौ परं ब्रह्माभिधीयते" (रामपूर्वताप०) 'ॐ यो वैश्रीरामचन्द्रः स भगवानद्वैतपरमानन्दात्मा यः परं ब्रह्म भूर्भुव स्वस्तस्मै वै नमो नमः ॥१॥' (रामोत्तरताप०) 'राम एव परं ब्रह्म राम एव परं तपः । राम एव परं तत्त्वं श्रीरामो ब्रह्म

---

* एतेन 'जीवाम केन ? इति प्रश्नस्योत्तरमभिहितम् ।
× एतेन 'क्व च सम्प्रतिष्ठा ?' इति प्रश्नस्योत्तरमुक्तम् ।
+ एतेन 'अधिष्ठिताः केन सुखेतरेष्वित्यादिप्रश्नोदत्तोतरो भवति ।

संयुक्तमेतत् क्षरमक्षरञ्च व्यक्ताव्यक्तं भरते विश्वमीशः ।
अनीशश्चात्मा बध्यते भोक्तृभावाज् ज्ञात्वा देवं मुच्यते सर्वपाशैः ॥८
ज्ञाज्ञौ द्वावजावीशनीशावजा ह्येकाभोक्तृभोगार्थयुक्ता ।
अनन्तश्चात्मा विश्वरूपो ह्यकर्त्ता त्रयं यदा विन्दते ब्रह्ममेतत् ॥९॥

तारकम् ॥''(रामोपनिषत्) 'नारायणं परं ब्रह्म' स्वेमहिम्नि प्रतिष्ठितः' 'एतद् वैतदक्षरं गार्गि ब्रह्मणा अभिवदन्ति, इत्यादिश्रुतिषूद्गीतं परब्रह्मतया स्वप्रतिष्ठिततयाऽक्षरतया चोच्चैर्गीतम् । क्वचिदुद्गीथमिति पाठः । अर्थस्तु तत्राप्येष एव । तस्मिन् स्वप्रतिष्ठाक्षरात्मके परमब्रह्मणि त्रयं प्रकृतिपुरुषकालत्रयमाश्रितमिति शेषः । वेदविदस्तत्परास्तदेव ब्रह्म परमं येषां ते तत्परा ब्रह्मपरा । ब्रह्मावासिकामा इत्यर्थः । अत्रास्मिन् परमे ब्रह्मण्यन्तरं प्रकृतिपुरुषकालानां ब्रह्मशरीरत्वेन ब्रह्मापृथक्सिद्धत्वेनान्तरशब्दाभिहितमाधाराधेयभावात्मकं भेदं विदित्वाऽवगम्य योनिमुक्ताः प्रकृतिसम्बन्धनिर्मुक्ताः सन्तो लीना परमं साम्यमवाप्य नामरूपविभागानर्हतामवाप्ताः ॥७॥

नन्वविशिष्ट एव जीवपरमात्मनोः प्रकृतिसम्बन्धस्तर्हि जीव एव कुतो बध्यते न परमात्मेत्यत आह संयुक्तमिति । ईशः परमात्मा व्यक्ताऽव्यक्तं क्षरमचिद्वर्गमक्षरं चिद्वर्गं संयुक्तं भोक्तृभोग्यतया मिथः संयुक्तमेतद्विश्वं सर्वं भरते विभर्त्यथापि स न बध्यते ''न मां कर्माणि लिम्पन्ति न मे कर्मफलेस्पृहा ।' इति वचनप्रामाण्यात् कर्मफलस्पृहाभाववत्त्वेनापहतपाप्मत्वेन चेशस्य कर्मलेपाभावात् । अनीशश्चात्मा जीवस्तु भोक्तृभावादैहिकक्षुद्रफलकामनया निषिद्धस्यामुष्मिकफलकामनया च काम्यस्य कर्मणः कर्तृत्वाद् बध्यत एव । यदा तु भगवत्कृपया जातवैराग्यः सन् भगवन्निष्ठं सद्गुरुमासादयदि तदा देवमनन्तकरुणावरुणालयं स्वप्रकाशं देवशब्दवाच्यं परब्रह्म भगवन्तं श्रीरामं ज्ञात्वा विदित्वा सर्वपाशैः कर्मक्लेशाद्यखिलपाशैर्मुच्यते । नित्यमनवधिकातिशयसुखरूपं च ब्रह्मानुभवात्मकं मोक्षमवाप्नोति ॥८॥

''ज्ञात्वा देवं मुच्यते सर्वपाशैः'' इत्युक्तं मोक्षकारणं परमात्मविज्ञानम्, तच्च चिदचिद्वैलक्षण्यापन्नपरमात्मविषयकमेवेत्यभिदधाति—ज्ञाज्ञाविति । प्रागभिहितयोर्जीवपरमात्मा ज्ञः सर्वज्ञोऽत एवेशः । जीवस्त्वज्ञोऽल्पज्ञोऽत एवानीशः । अजत्वमुत्पत्तिशून्यत्वम् । तच्चोभयोस्तुल्यमेव । ईशनीशाविति छान्दसो दीर्घाभावः । अजत्वेन जीवेश्वरतुल्या ताभ्यां भिन्नैका प्रकृतिरप्यस्ति । सा हि भोक्तृभोगार्थयुक्ता भोक्तुर्जीवस्य भोगरूपार्थेन विशिष्टा न तु परमात्मभोगार्थयुक्ता । कुत इतिचेदाह—अनन्तश्चेति ।

क्षरं प्रधानममृताक्षरं हरः क्षरात्मानावीशते देव एकः ।
तस्याभिध्यानाद् योजनात् तत्त्वभावाद् भूयश्चान्ते विश्वमायानिवृत्तिः ।

विश्वरूपो विश्वशरीरकोऽप्यात्मा । सर्वान्तर्यामीपरमात्मेत्यर्थः । यतः सत्यकामत्वाद्यनन्तकल्याणगुणाश्रयत्वेनानन्तोऽत एवाकर्त्ता न जीववत् फलमभिसन्धाय कर्मानुष्ठाताऽतो न प्रकृतेः परमात्मभोगार्थयुक्तत्वम् । ईदृशवैलण्यज्ञानस्य किं फलमत आह-त्रयमिति एतत् त्रयं चिदचिदीश्वरश्चेति तत्त्वत्रयं यदा विन्दते जीवो यदा मिथोविलक्षणतया दर्शनसमाकारापन्नेन ध्यानेन विषयीकरोति तदा ब्रह्मं ब्रह्म भवति ब्रह्मोपासनकालेसर्वेश्वर श्रीरामानुभविता भवति । अत्र ब्रह्ममिति मान्तत्वं छान्दसमिति वेदितव्यम् ॥९॥

अथाखिलप्रकृतिसंसर्गनिवृत्तिहेतुमभिधत्ते—क्षरमिति । संयुक्तमेतत् क्षरमक्षरञ्चेत्यभिहितक्षरपदार्थमभिधत्ते प्रधानमिति । प्रधानपदव्यपदिष्टं प्रकृतितत्त्वमिहक्षरम् । क्षरपदवाच्यमित्यर्थः । अथाक्षरपदं विवृणोति—अमृताक्षरं हर इति । भोग्यान् पदार्थान् स्वभोगार्थं हरतीति हरो जीव एवात्र मृत्युरहितमक्षरमित्यर्थः । न च रुद्रार्थकोऽयं हरशब्दो देव एक इत्यत्रैवान्वेति नामृताक्षरमित्यत्रेति वाच्यम्, व्यवधानादेतस्यैवामृताक्षरपदस्योद्देश्यविधेयभावसमर्पणाभावाद् "भवान्नारायनो देवः" इतिब्रह्मवाक्यस्य प्रमाणतया परब्रह्मणो भगवतः श्रीरामस्य वाचके देवशब्दे हरशब्दान्वयस्याशक्यत्वाच्च । क्षरञ्चात्मा च क्षरात्मानौ प्रकृतिजीवात्मानावेको देवो सर्वेश्वर श्रीराम ईशते नियमनं करोति* । तस्याखिलचेतनाचेतनानियन्तुर्देवशब्दाभिहितस्य ध्येयवस्तुभूतस्य भगवतः श्रीरामस्याभिध्यानादारम्भणपरिशीलनाद् योजनायोगाद् । भक्तियोगादित्यर्थः । तत्त्वभावाद्दर्शनसमानाकारज्ञानात्मकतत्त्वाविर्भादन्ते चरमदेहावसाने भूयो विश्वमायानिवृत्तिर्निखिलमायानिवृत्तिर्भवतीतिशेषः ॥१०॥

अथ पूर्वमन्त्रोक्ततत्त्वभावात्मकज्ञानसाध्याया मुक्तेः क्रममभिधत्ते—ज्ञात्वेति । देवं देवशब्दाभिधेयं परिपूर्णं ब्रह्म भगवन्तं श्रीरामं ज्ञात्वा दर्शनसमानाकारज्ञानविषयं कृत्वा पाश्यत एभिरिति पाशः बन्धहेतुभूतानि पुण्यपापात्मकानि कर्माणि । सर्वे च ते पाशाः सर्वपाशास्तेषामपहानिर्भवति । सर्वपाशापहानिश्च पूर्वोत्तरपुण्यापुण्यात्मककर्माश्लेषविनाश एव "तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात्"

* न चैवम् "अपहतपाप्मा दिव्यो देव एको नारायणः" इति श्रुतिविरोधः शङ्कनीयः नराणां समूहो नारं तदयनमस्येति व्युत्पत्त्या नारायणशब्दस्य श्रीरामवाचकत्वाङ्गीकारात् । उक्तं च रामायणे "भवान्नारायणो देवः" इति पद्मपुराणे श्रीरामं प्रति परशुरामेणाप्युक्तम्—"नारायणस्त्वमीशस्त्वम्" इति ।

ज्ञात्वा देवं सर्वपाशापहानिः क्षीणैः क्लेशैर्जन्ममृत्युप्रहाणिः ।
तस्याभिध्यानात् तृतीयं देहभेदे विश्वैश्वर्यं केवल आप्तकामः ११।
एतज्ज्ञेयं नित्यमेवात्मसंस्थं नातः परं वेदितव्यं हि किञ्चित् ।
भोक्ता भोग्यं प्रेरितारञ्च मत्वा सर्वं प्रोक्तं त्रिविधं ब्रह्ममेतत् ॥१२

(ब्र. सू. ४।१।१३) "इतरस्याप्येवमश्लेषः पाते तु' (ब्र. सू. ४।१।१४।) इति सूत्रयोर्भगवता बादरायणेन तथैवोक्तत्वात् । स च पूर्वोत्तरकर्माश्लेषविनाशो भगवत्सङ्कल्पस्वरूप एव । उक्तं च प्रमिताक्षरावृत्तिकृद्भिर्जगद्गुरुश्रीदेवानन्दाचार्यैः—"तौ चोत्तरपूर्वाघयोरश्लेषविनाशौ 'उपासनान्ते क्षमिष्ये' इति परब्रह्मणो भगवतः श्रीरामस्य सङ्कल्पात्मकावेव ।" (श्रीबोधायनवृत्तिसार ४।१।१३) इति जातायां च सर्वपाशपहानौ क्षीणैः क्लेशसाधकैर्देहेन्द्रियादिभिः सह जन्ममृत्युकारकाणां समेषां कर्मणां प्रहाणिः प्रकृष्टो विनाशश्च भवति । सूत्रितं च भगवता बादरायणेन 'साम्पराये तर्त्तव्याभावात् तथा ह्यन्ये' (३।३।२७) इति । एषा प्रहाणिरपि 'क्षान्तम्' इति भगवत्संकल्पात्मिकैवेति ध्येयम्॥ । तस्य परमात्मनोऽभिध्यानात् तृतीयं सर्वाधिकमपहतपाप्मत्वाद्यात्मकं सायुज्यलक्षणं स्वर्गाद्यैश्वर्यविलक्षणं विश्वात्मकब्रह्मण ऐश्वर्यं देहभेदे प्राकृतदेहविलक्षणे शुद्धसत्वमये देहविशेषे भवति । केवलः प्राकृतसम्बन्धमुक्त एव साकेताख्यदेशविशिष्टं ब्रह्मावाप्यैवाप्तकामो भवति प्रकृतिमण्डले तु आप्तकामो नैव भवतीत्यर्थः ॥११॥

अथ विश्वैश्वर्यमित्यभिधानेन जगद्व्यापारात्मकमैश्वर्यमपि मुक्तस्य स्यादिति सर्वप्रकारकं साम्यं परमात्मैक्यं वा तस्य स्यादित्येवम्भूतं मन्तव्यं वारयति—एतदिति । एतत् परं ब्रह्म नित्यमात्मासंस्थमन्तर्यामित्वेनात्मनि संस्थितमेव ज्ञेयमवबोध्यम् । जीवात्मदेवात्मनोः शरीरशरीरिसम्बन्धो मुक्तावपि तिष्ठत्येवेति न तदानीमपि जीवपरात्मनोरैक्यं सर्वप्रकारकं साम्यं वा भवतीति भावः । तथा च विश्वैश्वर्यमपि तस्य प्राकृतविश्वातिशायि जीवात्मना सम्पादयितुं शक्यं विश्वमैश्वर्यमित्यर्थो वेदितव्यः । ननु निर्गुणदशायामैक्यं स्यादेवेत्यत आह—नात इति । अत एवम्भूताद् ब्रह्मणः परं किञ्चिदपि वेदितव्यं ज्ञेयान्तरं न नावशिष्यत इत्यर्थः । भोक्तृभूतचेतनशरीरको भोग्यं भोग्यभूताचेतनशरीरकः । प्रेरितारमिति द्वितीयान्तत्वं छान्दसम् । तथा च प्रेरिता

॥ प्रोपसर्गोच्चारणबलादेतद्धि जन्ममृत्युहानं प्रलयकालीनजन्ममृत्युहानभिन्नं जन्मान्तरप्रागभावासमानकालीनं च बोध्यम् ।

वह्नेर्यथा योनिगतस्य मूर्त्तिर्न दृश्यते नैव च लिङ्गनाशः ।
स भूय एवेन्धनयोनिगृह्यस्तद्वोभयं वै प्रणवेन देहे ॥१३

आत्मानमरणिं कृत्वा प्रणवं चोत्तरारणिम् ।
ध्याननिर्मथनाभ्यासाद् देवं पश्येन्निगूढवत् ॥१४॥

तिलेषु तैलं दधनीव सर्पिरापः स्रोतःस्वरणीषु चाग्निः ।
एवमात्माऽऽत्मनि गृह्यतेऽसौ सत्येनैनं तपसा योऽनुपश्यति ॥१५॥

सर्वव्यापिनमात्मानं क्षीरे सर्पिरिवार्पितम् ।
आत्मविद्यातपोमूलं तद्ब्रह्मोपनिषत्परम् तद्ब्रह्मोपनिषत्परम् ॥१६

इति श्वेताश्वतरोपनिषदि प्रथमोऽध्यायः ॥१॥

नित्यनिरतिशयानन्तदिव्यगुणगणाश्रयो भगवान् श्रीराम एतत् त्रिविधं प्रोक्तमभितं सर्वं मत्त्वा ज्ञात्वा ब्रह्मं ब्रह्मसाम्यापन्नो मुक्तो भवति । ब्रह्ममिति मान्तत्वं छान्दसम् ॥१२॥

अथात्मसंस्थस्य परात्मनोऽनुपलब्धिशङ्कामपाकरोति—वह्नेरिति । यथा योनिगतस्यारण्यादिकाष्ठवृत्तेर्वह्नेर्विभावसोर्मूर्तिः स्वरूपं न दृश्यते प्रत्यक्षप्रमाणेन नोपलभ्यते किन्तु लिङ्गनाशो लिङ्गस्य वह्न्यनुमापकस्य धूमात्मकस्य लिङ्गस्यदर्शनं नैवास्ति किन्त्वरण्यादिमथनेसति धूमस्योपलब्धिरेव भूयः पश्चान्मथने सति स वह्निरेवेन्धन योनिगृह्य इन्धनात्मकयोनिप्रभवत्वेन गृह्यते । तद्वेत्यत्र वाशब्दः सादृश्यार्थकः । तथा च तद्वा तद्वत् प्रणवेन प्रणवात्मकेन साधनेन देहे 'यस्यात्मा शरीरम्' इति श्रुत्यभिहितपरमात्मदेहात्मके जीवात्मनि शोध्यमाने सत्युभयमात्मलक्षणदेहस्थं ब्रह्म तल्लिङ्गं चोपलब्धं भवति । प्रेरकत्वादिना लिङ्गेनात्मसंस्थस्य ब्रह्मण उपलब्धिर्भवतीत्यर्थः ॥१३॥

प्रणवेन यथा तत् प्रकाश्यते तदाह—आत्मानमिति । आत्मानं स्वात्मानमरणिमधरारणिं कृत्वा विधाय । प्रणवेन स्वात्मनो ध्यानं कृत्वेत्यर्थः । ध्याननिर्मथनाभ्यासाद् ध्यानमेव स्वप्रेरकत्वादिचिन्तनमेव निर्मथनं तस्याभ्यासाद् देवं द्योतनस्वभावशालिस्वान्तर्यामिणं भगवन्तं श्रीरामम् । निगूढवत् । अत्रारणिदृष्टान्तबलेन निगूढवदित्यस्य निगूढाग्निवदित्यर्थः । स्वात्मनि स्थितं पश्येदुपलभेत ॥१४॥

अथोक्तमेव प्रपञ्चयति—तिलेष्विति । यथा यन्त्रपीडनेन तिलेषु तैलं मथनेन दधनि सर्पिर्भूखननेन स्रोतस्स्वापो मथनेनारणिषु चाग्निर्गृह्यत एवं यः पुरुष एनं परमात्मानं

॥ अथ द्वितीयोऽध्यायः ॥

युञ्जानः प्रथमं मनस्तत्त्वाय सविता धियः ।
अग्निं ज्योतिर्निचाय्य पृथिव्या अध्याभवत् ॥१

सत्येन तपसा चोपायेनानुपश्यति तेनासावात्माऽऽत्मनि स्वात्मनि गृह्यत उपलभ्यते ॥१५॥

अथ प्रकरणार्थस्योपसंहारं करोति—सर्वव्यापिनमिति । क्षीरेपयस्यर्पितं व्याप्तं सर्पिरिव घृतमिव सर्वंव्याप्तुं शीलमस्येति सर्वव्यापी तं सर्वव्यापिनमात्मानमात्मविद्यातपोमूलमात्मविद्यया तपसा च ज्ञेयमुपनिषत्परमुपनिषदां परमं प्रतिपाद्यं तं तत् परं ब्रह्म विद्यादिति शेषः । द्विरुक्तिरादराधिक्यमध्यायसमाप्तिं च द्योतयति ॥१६॥

इति श्वेताश्वतरोपनिषदोभगवच्छ्रीरामानन्दाचार्यप्रणीतानन्दभाष्येप्रथमोऽध्यायः ॥१॥

॥

प्रथमाध्याये मुख्योपायतया ध्यानमभिहितम् । तत्प्रकारमवगमयितुमारभ्यते द्वितीयोऽध्यायः । परमात्माऽऽत्मसंस्थस्तत्प्रतीत्युपयोगीन्द्रियनिग्रहलक्षणतपः सिद्ध्यनुगुणपरमात्मविषयकप्रार्थनासम्बन्धिमन्त्रमभिधत्ते—युञ्जान इति । अत्रधीपदं सर्वेन्द्रियाणामुपलक्षणम् । तथा च धियः सकलेन्द्रियाणां सविता गायत्रीमन्त्रप्रतिपाद्यःसर्वेषां प्रेरकःपरमात्मा श्रीरामः 'एतत्सवितुर्वरेण्यंध्रुवमचलममृतं भर्गाख्यं विष्णुसंज्ञं सर्वाधारं धाम" "ॐ यो वै श्रीरामचन्द्रः स भगवान् यश्च सूर्यो भूर्भुवः स्वस्तस्मै वै नमो नमः" (रामोत्तरतापिनी २७) "ॐ यो वै श्रीरामचन्द्रः स भगवानद्वैतपरमानन्दात्मा ये च द्वादशादित्या भूर्भुवः स्वस्तस्मै वै नमो नमः" (रा० ता०) "सविता सर्वभूतानां सर्वभावान् प्रसूयते । सवनात् पवनाच्चैव सविता तेन उच्यते ॥" (याज्ञवल्क्यः) 'प्रजानां च प्रसवनात् सवितेत्यभिधीयते ॥' (विष्णुधर्मोत्तर०) 'सूर्यस्यापि भवेत् सूर्यो ह्यग्नेरग्निः प्रभोः प्रभुः ।' 'आदित्यमण्डलगतं निश्चितार्थस्वरूपिणम् । भक्तप्रियं पद्मनेत्रं भक्तानामीप्सितप्रदम् ॥' (सनत्कुमारसंहितास्थः श्रीरामस्तवराजः) । 'सूर्यमण्डलमध्यस्थं रामं सीतासमन्वितम् ।' (रामस्तव०) 'ब्रह्मा विष्णुश्च रुद्रश्च त्वमेव रघुनन्दन ॥' (रामस्तव०) 'ततो रामशरीरे वै रामः पश्यति भार्गवः । आदित्यान् सवसून् रुद्रान् साध्यांश्च समरुद्गणान् ॥' (महाभारते) इत्यादि श्रुतेः स्मृतेश्च । प्रेरणार्थकात् पूधातोस्तृचि सवितेति निष्पन्नः । पृथिव्याः क्षितेरध्यूर्ध्वमग्निमग्न्यात्मकं ज्योतिर्निचाय्य सम्यक्

युक्तेन मनसा वयं देवस्य सवितुः सवे। सुवर्गेयाय शक्त्या ॥२॥

युक्त्वाय मनसा देवान् सुवर्यतो धिया दिवम्।
बृहज्ज्योतिः करिष्यतः सविता प्रसुवाति तान् ।३।

युञ्जते मन उत युञ्जते धियो विप्रा विप्रस्य बृहतो विपश्चितः।
वि होत्रा दधे वयुनाविदेक इन्महीदेवस्य सवितुः परिष्टुतिः ।४।

पूजयित्वाऽग्निहोत्रादिकर्म कृत्वा तत्त्वाय तत्त्वसाक्षात्काराय पृथिवीवृत्त्यग्निज्योतिः सदृशात्मवृत्तिपरमात्मसाक्षात्कारायेत्यर्थः। मनो युञ्जानो नियुञ्जान आभवद् भवतु।१।

अथ तदनन्तरकृत्यमाह—युक्तेनेति। देवस्य 'भवान् नारायणो देवः' (वाल्मीकि रा० यु०) 'मङ्गलायतनं देवं रामं राजीवलोचनम् ॥' (रामस्तव०) इति प्रमाण्याद् देवशब्दवाच्यस्य स्वजनहर्षप्रदस्य सवितः प्रेरयितुः सर्वेश्वरस्य भगवतः श्रीरामस्य सवेऽनुज्ञायां सत्यामनुज्ञयेत्यर्थः। युक्तेन भगवदुन्मुखेन मनसा चेतसा विशिष्टा वयं सुवर्गेयायानवधिकातिशयानन्दविशिष्टभगवल्लोकसाधनाय भगवन्निदिध्यासनकर्मणे शक्त्या युक्ता भवेमेति शेषः ॥२॥

अथ स्वान्तरङ्गभूतश्रीहनुमदाद्याचार्यप्रणतिपूर्वकं स्वप्राप्तौ यतमानानामेव भगवाननुज्ञां ददातीत्येतदाह—युक्त्वायेति सुवः सुवर्पदप्रतिपाद्यमनवधिकातिशयानन्दविशिष्टं भगवल्लोकं यतः प्राप्तान् देवान् द्योतमानान् हनुमदादीन् पूर्वाचार्यान् मनसा युक्त्वाय, अत्र छन्दसि 'क्त्वो यक्' इति यक्। तथा च मनसा युक्त्वायेत्यस्य प्रणम्येत्यर्थः। दिवं द्योतनस्वभावं बृहन्निरतिशयबृहत्वविशिष्टं परमात्मलक्षणं ज्योतिर्धियोपासनात्मकेन ज्ञानेन करिष्यतो विषयीकरिष्यमाणान् तान् मुमुक्षून् सविता निखिलप्रेरकः सर्वेश्वरो भगवान् श्रीरामः प्रसुवात्यनुजानाति ॥३॥

अथ ब्रह्मस्वरूपवेत्तारं एव भगवति मनो नियुज्य भगवत्समाराधनात्मकं कर्म कुर्वन्तीत्याह—युञ्जत इति। विप्रास्तत्ववेत्तारो मन उत धियो मनोऽतिरिक्तान्यन्यान्यपि ज्ञानेन्द्रियाणि परमात्मन्येव युञ्जते योजयन्ति। विप्रस्य परिपूर्णस्य बृहतो बृहद्गुणाश्रयस्य विपश्चितः सर्वज्ञस्य द्योतमानस्य सवितुरखिलप्रेरयितुर्भगवतः श्रीरामस्य वयुनाविद् वयुनं ज्ञानं तद्वित्। छान्दसो दीर्घः। भगवतः सार्वज्ञ्यादिमहिम्नो वेत्तेत्यर्थः। एक इदेक एव मही महतीः परिष्टुतिः परिष्टुतीः। अत्र ह्रस्वत्वं छान्दसम्। परिचर्या इत्यर्थः। होत्रा ऋत्विग्भिर्मन्त्रेण वा विदधे कृतवान्। भगवत्सार्वज्ञ्यादिमहिमज्ञानमेव भगवत्प्रीतिहेतुरिति तादृग् ज्ञानमेव मुमुक्षुभिरर्जनीयमित्यर्थः ॥४॥

युजे वां ब्रह्म पूर्व्यं नमोभिर्विश्लोक एतु पथ्येव सूरेः।
शृण्वन्तु विश्वे अमृतस्य पुत्रा आ ये धामानि दिव्यानि तस्थुः॥
अग्निर्यत्राभिमथ्यते वायुर्यत्राधिरुध्यते।
सोमो यत्रातिरिच्यते तत्र सञ्जायते मनः॥६॥
सवित्रा प्रसवेन जुषेत ब्रह्म पूर्व्यम्।
तत्र योनिं कृण्वसे न हि ते पूर्तिमक्षिपत्॥७॥

अथ योगप्रवृत्तेः प्राक्तनस्य सर्वेश्वरस्तवस्य कर्त्तव्यतामाह युज इति। ये दिव्यानि प्राकृतलोकविलक्षणाणि धामानि नित्यधामपदवाच्यानि धामान्यातस्थुर्नित्यधामस्थितास्ते विश्वे सर्वेऽमृतस्याविनाशिनो ब्रह्मणः पुत्राः पुत्रतुल्या नित्यमुक्ता इत्यर्थः। शृण्वन्त्वाकर्णयन्तु मम प्रार्थनामिति शेषः। सूरेः नित्यसूरिकर्तृकत्वविशिष्टा पथोऽनपेता पथ्या स्तुतिर्वा पूर्व्यं वः पूर्वम्। अत्र वामिति वचनव्यत्ययश्छान्दसः। तथा विश्लोको ब्रह्मेव भगवन्तं श्रीरामं यथा प्राप्नोति। मया कृतः स्तुतिरूपो विविधः श्लोको नमोभिर्नमस्कारैः सह युजे योगाय। ब्रह्मावाप्तय इत्यर्थः। एत्ववाप्नोतु। हे हनुमदादयो नित्यमुक्ता भवद्भिस्तथाविधेयं यथाभवत्कृतां स्तुतिमिव भगवान् श्रीरामो मत्कृतामपि स्तुतिमङ्गीकुर्यादिति नित्यमुक्तविषयप्रार्थनाअभिप्रायः। अत्र ब्रह्मणो नित्यसूर्यपेक्षया पूर्वत्वं तु नित्यसूरीणां ब्रह्मणोऽनुत्पन्नत्वेऽपि ब्रह्माधीनस्वरूपस्थितिप्रवृत्तिकत्वादेव बोध्यम्॥५॥

अथ योगमारभमाणस्य शीतोष्णदेशपरिहरणीयतामाह—अग्निरिति। यत्र यस्मिन् देशेऽग्निः पावकोऽभिमथ्यतेऽभितो मथ्यते निवार्यते। यत्र वायुर्मातरिश्वाऽधिरुध्यतेऽधिकतया रुध्यते। यत्राधिकं वायुर्नवातीत्यर्थः। यत्र च सोमः सोमपदलक्षितो हिमो नातिरिच्यतेऽतिशयेन निरस्यते तत्र मनो ध्येयोन्मुखं संजायते॥६॥

अथ योगमारभमाणस्य ध्येयमाह—सवित्रेति। सवित्रोक्तेन प्रकारेण कृताभ्यां गुरुप्रणामभगवत्स्तुतिभ्यां प्रसन्नतामवाप्तेनाखिलप्रेरकेन परमात्मना कृतेन प्रसवेनानुज्ञया योगे प्रवर्त्तमानः पूर्व्यं पूर्वसृष्टं ब्रह्म जुषेत सेवेत। ध्यायेदितियावत्। तत्र तस्मिन् परमात्मनि योनिं मनोनिष्ठां कुरुष्व। हि यस्मात् तथा कृते सति तद्ब्रह्म ते तव पूर्तिं समीहितपूरणं नाक्षिपत् न क्षिपति। समीहितपूर्तिं न निरस्यतीत्यर्थः। अत्राक्षिपदिति लङर्थे लङ्॥७॥

त्रिरुन्नतं स्थाप्य समं शरीरं हृदीन्द्रियाणि मनसा संनिवेश्य ।
ब्रह्मोडुपेन प्रतरेत विद्वान् स्रोतांसि सर्वाणि भयावहानि ॥८॥
प्राणान् प्रपीड्येह स युक्तचेष्टः क्षीणे प्राणे नासिकयोच्छ्वसीत ।
दुष्टाश्वयुक्तमिव वाहमेनं विद्वान् मनो धारयेताप्रमत्तः ॥९॥
समे शुचौ शर्करावह्निवालुकाविवर्जिते शब्दजलाश्रयादिभिः ।
मनोऽनुकूले न तु चक्षुपीडने गुहानिवाताश्रयणेन योजयेत् ॥१०॥

अथ संसारतारकयोगदशाप्रकारमभिधत्ते—त्रिरुन्नतमिति । त्रीण्युन्नतानि यस्मिस्तत् त्रिरुन्नतमुरोग्रीवाशिरोदेशेषून्नतमन्यत्र समं शरीरं स्थाप्य संस्थाप्येत्यर्थः । इन्द्रियाणि सर्वाणि चेन्द्रियाणि मनसा हृदि हृदये संनिवेश्य संनिधाय । संनियम्येत्यर्थः। ब्रह्मैवोडुपो ब्रह्मोडुपस्तेन ब्रह्मोडुपेन ब्रह्मपदवाच्यप्रणवात्मकेनप्लवेन । ब्रह्मध्यानेनेत्यर्थः । यद्वा "श्रीरामेति परं जाप्यं तारकं ब्रह्मसंज्ञकम्" (रामस्तव०) इत्यागमवचनप्रामाण्याद् ब्रह्मसंज्ञकेन षडक्षरश्रीराममन्त्रप्लवेन यद्वा ब्रह्मलक्षणप्लवेन । भगवत्साहाय्येनेत्यर्थः । विद्वान् सर्वाणि भयावहानि भयप्रदानि स्रोतांसि विविधयोनिजन्मस्रोतांसि प्रतरेत् प्रकर्षेण तरेत् ॥८॥

अथ प्राणायामविधिमभिधत्ते—प्राणानिति । इह योगकाले स पूर्वोक्तो विद्वान् 'युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु । युक्तस्वप्नावबोधस्य योगो भवति दुःखहा ॥' (गी० ६।१७) इति भगवद्वचनानुसारेण युक्तचेष्टः परिमितचेष्टः सन् प्राणान् प्रपीड्य प्राणानां निरोधं विधाय प्राणे क्षीणे सति पीडां परिहर्तुं नासिकया नासारन्ध्रेणोच्छ्वसीत निरुद्धस्य प्राणवायो रेचनं विदध्यात् । ततोऽप्रमत्तः प्रमादरहितः सन् दुष्टाश्वयुक्तं वाहं स्यन्दनमिव । यथा निपुणः सारथिर्दुष्टतुरङ्गयुक्तं रथं स्ववशं करोति तथेत्यर्थः । एनं मनो धारयेत् स्ववशं नयेत् । अत्रैनमिति पुंस्त्वं छान्दसम् ॥९॥

अथ योगानुष्ठानार्हं देशमभिधत्ते—सम इति । समे निम्नोन्नतभावशून्ये शुचौ पवित्रे शर्करावह्निवालुकाविवर्जिते क्षुद्रोपलपावकसिकताविरहिते शब्दजलाश्रयादिभिः कलहादिध्वनिजलाशयादिभिश्च 'विरहिते' इति शेषः । मनोऽनुकूले चित्तानुकूल्यविशिष्टे न तु चक्षुपीडने चक्षुः पीडाजनकोष्णत्वादिशून्ये । अत्र चक्षुपीडन इत्यत्र छान्दसो विसर्गलोपः । मनोऽनुकूले चित्तानुकूल्यविशिष्टे देशे गुहानिवाताश्रयणेन गुहादिरूपवायुशून्यस्थानं समाश्रित्य योजयेद् योगानुष्ठानं कुर्यात् । सूत्रितञ्च भगवद्भिर्बादरायणैः "यत्रैकाग्रता तत्राविशेषात्' इति । व्याख्यातञ्च तत् श्रीबोधायनवृत्तिसारापर-

नीहारधूमार्कानिलानलानां खद्योतविद्युत्स्फटिकशशीनाम् ।
एतानि रूपाणि पुरस्सराणि ब्रह्मण्यभिव्यक्तिकराणि योगे ॥११॥
पृथिव्यप्तेजोऽनिलखे समुत्थिते पञ्चात्मके योगगुणे प्रवृत्ते ।
न तस्य रोगो न जरा न मृत्युः प्राप्तस्य योगाग्निमयं शरीरम् ॥१२
लघुत्वमारोग्यमलोलुपत्वं वर्णप्रसादं स्वरसौष्ठवं च ।
गन्धः शुभो मूत्रपुरीषमल्पं योगप्रवृत्तिं प्रथमां वदन्ति ॥१३।
यथैव बिम्बं मृदयोपलिप्तं तेजोमयं भ्राजते तत् सुधान्तम् ।
तद्वाऽऽत्मतत्त्वं प्रसमीक्ष्य देही एकः कृतार्थो भवते वीतशोकः ॥

पर्यायप्रमिताक्षरावृत्तिकारैर्जगद्गुरुभिः श्रीदेवानन्दाचार्यैः—'समे शुचौ शर्करावह्नि-वालुकाविवर्जिते शब्दजलाश्रयादिभिः । मनोऽनुकूले न तु चक्षुपीडने गुहानिवाताश्र-यणेन योजयेत् ॥' (श्वेता० २।१०) इत्यविशेषेणैकाग्रतानुकूलदेशविशेषस्यैवांगत्वाभि-धानाद् यत्र देशे काले वा मनस एकाग्रता स्यात् तत्रोपासीत' (प्रमिताक्षरावृत्तिः ४।१।११) इति ॥१०॥

अथ योगानुष्ठातुर्ब्रह्माभिव्यक्तिचिह्नान्यभिधीयन्ते—नीहारेति । साधकेन योगे प्रारब्धे क्रमशः नीहारधूमार्कानिलानलानां तुषारधूमरविपवनपावकानां खद्योतविद्युत्स्फ-टिकशशीनां खद्योतविद्युत्स्फटिकचन्द्रमसां क्रमशः स्फुरणानि भवन्ति । अत्र शशीना-मिति छान्दसं दैर्ध्यम् । एतानीमानि रूपाणि स्फुरणानि योगे ब्रह्मण्याविष्क्रियमाणे ब्रह्मणि पुरस्सराणि पूर्ववृत्तान्यभिव्यक्तिकराणि योगिनश्चित्त आविर्भूतानि भवन्ति ।११।

गुणनं गुणोऽभ्यासो योगस्य गुणो योगगुणः तस्मिन् योगाभ्यासे योगिनः कार्यसिद्धिमभिधत्ते—पृथिवीति । प्रवृत्ते सति पृथिव्यप्तेजोऽनिलखे सत्त्वप्रचुरपृथिव्या-दिपञ्चभूतसमारब्धे पञ्चात्मके पञ्चभूतात्मके देहे समुत्थिते योगाग्निमयं सर्वरोगदह-नसमर्थयोगाग्निप्रचुरं शरीरं प्राप्तस्य योगाग्निमयशरीरविशिष्टस्य योगिनो न रोगो भवति न जरा भवति न च मृत्युर्मरणं भवति ॥१२॥

अथ प्रथमां योगप्रवृत्तिमाह—लघुत्वमिति । यदा योगे प्रवृत्तस्य देहे लघुत्वमा-रोग्यं रोगराहित्यमलोलुपत्वं विषयवैतृष्ण्यं वर्णप्रसादं शरीरवर्णोज्वलत्वं स्वरसौष्ठवं स्वरसौन्दर्यं शुभो गन्धः शरीरे शुभो गन्धोऽल्पं मूत्रपुरीषं मूत्रमलयोर्न्यूनता च दृश्यते तदा योगसिद्धिज्ञापिकां प्रथमामाद्यां योगप्रवृत्तिं वदन्ति योगतत्त्वज्ञा इति शेषः ।

यदाऽऽत्मतत्त्वेन तु ब्रह्मतत्त्वं दीपोपमेनेह युक्तः प्रपश्येत् ।
अजं ध्रुवं सर्वतत्त्वैर्विशुद्धं ज्ञात्वा देवं मुच्यते सर्वपाशैः ॥१५॥
एष हि देवः प्रदिशोऽनु सर्वाः पूर्वो हि जातः स उ गर्भे अन्तः ।
स एव जातः स जनिष्यमाणः प्रत्यङ् जनास्तिष्ठति विश्वतोमुखः ॥१६॥

अथ योगसाधकस्य ब्रह्मसाक्षात्कारप्रकारं तत्फलञ्चाभिधत्ते—यथैवेति । यथा मृदयोपलिप्तं मृदाऽयसा वोपलिप्तं बिम्बं प्रतिमाविशेषः सुधान्तं सुधाविशेषाख्यरञ्जकद्रव्यलिप्तं तत् तेजोमयं सद् भ्राजते दीप्यते तद्वा तद्वत् सुधाविशेषोपलिप्ततेजोमयबिम्बमिव कश्चिद् देही पुरुषश्रेष्ठ आत्मतत्त्वं प्रसमीक्ष्य दर्शनसमानाकारध्यानेनोपलभ्य वीतशोको निवृत्तसंसारताप्रयुक्तशोकः सन् कृतार्थः सिद्धार्थो भवते भवतीत्यर्थः । तद्वेत्यत्र वाशब्द इवार्थकः ॥१४॥

अथान्तर्यामिब्रह्मतत्त्वावबोधेन सर्वबन्धनिवृत्तिमभिधत्ते—यदेति । यदा युक्तो योगानुष्ठातेह देहे दीपोपमेन दीपसदृशप्रकाशमानेन परमात्मावबोधोपायात्मकेनात्मतत्त्वेन परमात्मशेषभूतेन प्रत्यगात्मना साधनेनान्तर्यामिरूपेण तस्मिन्नात्मनि स्थितं ब्रह्मतत्त्वं सूक्ष्मवस्त्रान्तरितमाणिक्यसदृशं प्रपश्येद् ध्यानेनानुभवविषयं कुर्यात् तदैव । तु शब्द एवार्थकः । अजमनादिं ध्रुवं नित्यमुत्पत्तिविरहविशिष्टध्वंसाप्रतियोगिनं सर्वैः तत्त्वैः 'भूषणास्त्रस्वरूपस्थं यथेदमखिलं जगत् । बिभर्ति भगवान् विष्णुः...(विष्णुपुराण १-२२) इति पुराणरत्नवचनप्रामाण्यात् सर्वतत्त्वरूपभूषणास्त्रैरुपेतमिति शेषः । विशुद्धं समस्तहेयप्रतिभटं देवं 'भवान्नारायणो देवः' (वाल्मीकि यु०) इति ब्रह्मवाक्यप्रामाण्याद् देवपदवाच्यं सर्वेश्वरं श्रीरामं ज्ञात्वा साक्षादनुभवविषयं विधाय सर्वपाशैः पाशशब्दाभिहिताविद्यारूपनिखिलकर्मबन्धैर्मुच्यते ॥१५॥

अथ परमात्मनः सर्वात्मकतामभिधत्ते—एष इति । अथ मुनयः परस्परं सम्बोधयन्ति—हे जना इति । एष ह देवः 'विज्ञानहेतुं विमलायताक्षं प्रज्ञानरूपं स्वसुखैकहेतुम् । श्रीरामचन्द्रं हरिमादिदेवं परात्परं राममहं भजामि ॥' (रामस्तव०) इत्याद्यागमवचनप्रामाण्याद् देवपदवाच्यः सर्वेश्वरः श्रीराम एव सर्वात्मत्वेन सर्वशब्दवाच्यत्वात् सर्वाः प्रदिशस्तद्वृत्तिपदार्थाश्च । नुपदश्चार्थे ह शब्दश्चाप्यर्थकः । पूर्वो ह जातः कल्पादौ सकलेभ्यः पूर्वो हिरण्यगर्भरूपेणोत्पन्नोऽप्येष एव । गर्भे अन्तः स उ गर्भस्थोऽपि स एव जातः स जनिष्यमाणो जातो जनिष्यमाणश्च स एव । अतो विश्वतोमुखः सर्वतो मुखोऽखिलचेतनाचेतनवाचकसर्वपदवाच्यः सर्वान् प्रति प्रत्यङ् सन्

यो देवो अग्नौ अप्सु यो विश्वं भुवनमाविवेश ।
य ओषधीषु यो वनस्पतिषु तस्मै देवाय नमोनमः ॥१७

इति श्वेताश्वतरोपनिषदि द्वितीयोऽध्यायः ।२।

॥ अथ तृतीयोऽध्यायः ॥

य एको जालवानीशत ईशनीभिः सर्वांल्लोकानीशत ईशनीभिः ।
य एवैक उद्भवे सम्भवे च य एतद्विदुरमृतास्ते भवन्ति ॥१॥

सर्वत्र तिष्ठति । परस्परं भिन्नानां जीवानां कथमेकात्मकत्वमित्याशंकां निरस्यति--प्रत्यङ्ङिति । प्रत्यक्त्वं नामाहमर्थत्वेन भासमानत्वम् । वामदेवादीनामहमिति प्रत्यये भासमानत्वेन प्रत्यक्त्वात् परमात्मनः सर्वान् जीवान् प्रति प्रत्यक्त्वम् । नन्वस्मदाद्यहम्प्रत्ययेऽभानात् कथमस्मदादीन् प्रति प्रत्यक्त्वं परमात्मन इति चेन्न, दोषवशादभानेऽपि योग्यतासत्वेन दोषाभावात् ।।१६।।

परमात्मनो न स्वरूपेण सर्वत्वं किन्त्वन्तर्यामित्वेनैवेत्यावेदयति—यो देवो देवशब्दवाच्यः परमेश्वरः श्रीरामो न स्वरूपेण किन्त्वन्तर्यामितयैवाग्नावप्सु विश्वं भुवनं शाल्यादिष्वोषधीष्वश्वत्थादिषु वनस्पतिषु चाविवेश । तस्मै सर्वान्तर्यामित्वेन सर्वात्मने देवाय देवशब्दवाच्याय परमात्मने श्रीरामाय नमो नमोऽस्तु । द्विर्वचनमध्यायसमाप्त्यर्थमादरार्थञ्च बोध्यम् ।।१७।।

इति श्वेताश्वतरोपनिषदो भगवद् रामानन्दाचार्यप्रणीतानन्दभाष्ये द्वितीयोऽध्यायः ।२।

॥

प्रागुक्तयोगेनात्मसाक्षात्कारपूर्वकब्रह्मसाक्षात्कारः कथं सम्पाद्यत इत्येतदभिधायास्मिन् तृतीयेऽध्याये केवलं ब्रह्मण एव मोक्षप्रदातृत्वमस्तीति प्रतिपाद्यते । तत्र परमात्मनः सर्वेशितृत्वसर्वजगदुत्पत्यादिकारकत्वविषयकस्य ज्ञानस्य फलमाह—य एक इति । य 'इति रामपदेनासौ परब्रह्माभिधीयते' इत्यादिश्रुतिप्रसिद्धः सर्वेश्वरः श्रीराम एवैको जालवान् जालपदाभिहितमायात्मकवागुराविशिष्टः सन्नीशनीभिरीशनसामर्थ्यविशिष्टाभिर्ज्ञानबलक्रियाशक्तिभिः सर्वान् मायाजालगोचरानखिलान् प्राकृतांल्लोकानीशत ईष्टे । यश्चैक एव जगत उद्भवनमुद्भव उत्पादस्तस्मिन् सम्भवनं सम्भव एकीभावः । लय इति यावत् । तस्मिंश्चेष्टे । ये ये पुरुषा एतत् परमात्मनो निखिलेशितृत्वमखिलजगदुद्भवादिकारकत्वं च विदुरेतद्विषयकज्ञानरूपमोक्षसाधनसम्पन्नास्तेऽमृता मुक्ता भवन्ति ।।१।।

एको हि रुद्रो न द्वितीयाय तस्थुर्य इमाँल्लोकानीशत ईशनीभिः । प्रत्यङ् जनास्तिष्ठति सञ्चुकोचान्तकाले संसृज्य विश्वा भुवनानिगोपाः

अथ सृष्टिस्थितिप्रलयकर्त्तुर्मोक्षप्रदस्यैक्यमभिधत्ते—एक इति । हे जना य इमानखिलाँल्लोकानीशनीभिरीशनसमर्थाभिर्ज्ञानबलक्रियाशक्तिभिरीशत इष्टे प्रत्यङ् तिष्ठति स स्वभक्तानां संसाररुजं द्रावयति नरकादिपातेनाभक्तान् रोदयतीति वा रुद्रः ''ॐ यो वै श्रीरामचन्द्रः स भगवानद्वैतपरमानन्दात्मा ये चैकादश रुद्रा भूर्भुवः स्वस्तस्मै वै नमो नमः ।।'' (रामोत्तरतापिनी) 'दशग्रीवहरं रुद्रं केशवं केशिमर्दनम् । वालिप्रमथनं वीरं सुग्रीवेप्सितराज्यदम् ।। '' (रामस्तव० ४५) ब्रह्मा विष्णुश्च रुद्रश्च देवेन्द्रो देवतास्तथा । आदित्यादिग्रहाश्चैव त्वमेव रघुनंदन ।। (रामस्त. ६९) 'सनकादिमुनिश्रेष्ठास्त्वमेव रघुपुंगव? । वसवोऽष्टौ त्रयः काला रुद्रा एकादश स्मृताः ।।'' (रामस्तवराज ७२) इत्यादिनिगमागमवचनप्रामाण्याद् रुद्रपदवाच्यो सर्वेश्वरः श्रीराम एक एव हि विश्वाऽखिलानि भुवनानि संसृज्य सृष्ट्वा गोपा गोप्ता सन्नन्तकाले प्रलयकाले सञ्चुकोच संहृतवान् । (तस्य) द्वितीयाय द्वितीयत्वाय सहायरूपेण केचिदपि न तस्थुर्न स्थितवन्तः । रुद्रपदवाच्यः सर्वेश्वर एकः श्रीराम एव सृष्टिस्थितिलयमोक्षप्रदानादिकार्याणि करोतीत्यर्थः । अत्र रुद्रपदमुद्देश्यसमर्पकमेव न त्वेकोद्देशेन रुद्रत्वविधानसमर्पकं न द्वितीयाय तस्थुरित्यनेकतापक्षं व्युदस्यैकत्वपरताया स्पष्टमुल्लेखात् । उद्देश्यश्च प्रकृतः सर्वेश्वरोऽमृतपदवाच्यमोक्षसाधनज्ञानविषयो भगवान् श्रीराम एव । रूढ्यर्थापेक्षया संसारमोचकत्वरूपो यौगिकार्थ एव बलीयानत्ररुद्रशब्दस्य प्रकृतोपयोगित्वात् । प्रकृतश्चात्र 'य एतद्विदुरमृतास्ते भवन्ति' इति मोक्षसाधनज्ञानविषय एव । स च भगवान् श्रीराम एव । 'ॐ यो वै श्रीरामचन्द्रः स भगवान् यश्च तारकं ब्रह्म भूर्भुवः स्वस्तस्मै वै नमो नमः '(रामोत्तरतापिनी) 'तमेव विदित्वातिमृत्युमेति' इत्यादिषु श्रुतिषु 'भवाब्धिपोतं भरताग्रजं तं भक्तप्रियं भानुकुलप्रदीपम् । भूतत्रिनाथं भुवनाधिपत्यं भजामि रामं भवरोगवैद्यम् ।। '' (रामस्त०) इत्यादिष्वागमवाक्येषु च भगवतः श्रीरामस्यैव तारकब्रह्मत्वेन मोक्षसाधनज्ञानविषयत्वेन भवाब्धिपोतत्वेन भवरोगवैद्यत्वेन चाभिधानादत एव दुर्वादध्वान्तमार्त्तण्डैराचार्यवर्यैर्भगवद्भिः श्रीराघवानन्दाचार्यैरप्यभिहितं 'धर्मार्थकाम मोक्षाख्यपुरुषार्थप्रदायिने । अद्वितीयवदान्याय राघवेन्द्राय मङ्गलम् ।।''(श्रीराघवेन्द्रमङ्गलमाला) इति । रूढ्यर्थमपहाय रुद्रशब्दस्य यौगिकार्थ एवाश्रितः ''नमस्ते रुद्र-

विश्वतश्चक्षुरुत विश्वतो मुखो विश्वतो बाहुरुत विश्वतस्पात् ।
सं बाहुभ्यां धमति सम्पतत्रैर्द्यावाभूमी जनयन् देव एकः ॥३॥
यो देवानां प्रभवश्चोद्भवश्च विश्वाधिको रुद्रो महर्षिः ।
हिरण्यगर्भं जनयामास पूर्वं स नो बुद्ध्या शुभया संयुनक्तु ॥४॥

मन्यवे उतो त इषवे नमः । बाहुभ्यामुत ते नमः । " इति मन्त्रस्यमहीधरभाष्ये-ऽपि । तथाहि–"नम इति । रुत् दुःखं द्रावयतीति रुद्रः । यद्वा रु गतौ । ये गत्यर्थास्ते ज्ञानार्थाः । रवणं रुद् ज्ञानम् । भावेक्विप् । तुगागमः । रुद् ज्ञानं राति ददातीति रुद्रो ज्ञानप्रदः । यद्वा पापिनो नरान् दुःखभोगेन रोदयतीति रुद्रः । हे रुद्र ! ते तव मन्यवे क्रोधाय नमो नमस्कारोऽस्तु । उतोऽपि च ते तव इषवे बाणाय नमः । उतापि च ते तव बाहुभ्यां नमः । तव क्रोधबाणहस्ता अस्मदरिष्वेव प्रसरन्तु नास्मास्वित्यर्थः । " इति । "बाहुभ्याम्" इति द्विवचनान्तबाहुशब्दप्रयोगाद् द्विभुजो भगवान् श्रीराम एव रुद्रशब्दवाच्योऽत्र न तु चतुर्भुजः पञ्चवक्त्रो नीलकण्ठः शिव इति ॥२॥

अथ सर्वजगद्धेतोः सर्वेश्वरस्य भगवतः श्रीरामस्यासहायत्वेऽपि सर्वप्रपञ्चनिर्माणक्षमनित्यदिव्यविग्रहवत्वमभिधत्ते–विश्वत इति । विश्वतोऽभितश्चक्षुर्नेत्रं यस्य सः । अनन्तचक्षुरित्यर्थः । एवं विश्वतोऽभितोमुखानि सन्ति यस्य सः । अनन्तमुख इत्यर्थः । विश्वतो बाहुः । अनन्तबाहुरित्यर्थः । विश्वतस्पाद् अनन्तपादित्यर्थः । 'सहस्रशीर्षा पुरुषः' 'अनेकबाहूदरवक्त्रनेत्रम्' इत्याद्युक्तप्रकारेणानन्याधीनानन्तनयनादिविशिष्टदिव्यविग्रहशाली यः पूर्वोक्तो रुद्रपदवाच्योऽसहाय एव सर्वविधायकः सर्वेश्वरः श्रीरामः स एवैकः 'भवान्नारायणो देवः "(रामायणं) 'श्रीरामचन्द्रं हरिमादिदेवम्' (सनुत्कुमारसंहिता) इत्यादिवचनप्रामाण्याद् दीव्यतीति देवः क्रीडाकर्त्ता द्युतिमांश्च द्यावाभूमी द्युपृथिव्युपलक्षितमखिलं प्रपञ्चं सञ्जनयन्नुत्पादयञ्जीवान् बाहुभ्यां पतत्रैः पतत्रशब्दवाच्यपद्भिश्च संधमति संयोजयति । कर्मानुसृत्य सर्वेषां जीवानां बाहुपतत्रोपलक्षितशरीरेन्द्रियसम्बन्धं विदधातीत्यर्थः ॥ ३ ॥

अथ निखिलकारणस्य परब्रह्मणो भगवतः श्रीरामस्यैकतां मोक्षदातृताञ्चाभिधाय मोक्षहेतुभूतां बुद्धिं च तत एव याचते–य इत्यादिना । यः परमात्मा भगवान् श्रीरामो देवानां ब्रह्मादीनां सर्वेषाममराणामुद्भवत्यस्मादित्युद्भवः कारणमस्ति । उक्तञ्च रामायणे"प्रभवश्चाप्ययश्च त्वमुपेन्द्रो मधुसूदनः"(लंका)पद्मपुराणेभगवन्तंश्रीरामं प्रति

श्रीपरशुरामवाक्यम्—"राम राम महाबाहो न वेद्मि त्वां सनातनम् ।। जानाम्यद्यैव काकुत्स्थ तव वीर्यगुणादिभिः ।। त्वमादिपुरुषः साक्षात् परं ब्रह्म परोऽव्ययः ।। त्वमनन्तो महाविष्णुर्वासुदेवः परात्परः । नारायणस्त्वमीशस्त्वमीश्वरस्त्वं त्रयीमयः ।। त्वं कालस्त्वं जगत् सर्वमकाराख्यस्त्वमेव च । स्रष्टाधाता च संहर्त्ता त्वमेव परमेश्वर । त्वमचिन्त्यो महद्भूतरूपस्त्वं स्वगुणो महान् । चतुःषट्पञ्चगुणवान् त्वमेव पुरुषोत्तमः ।। त्वं यज्ञस्त्वं वषट्कारस्त्वमोङ्कारस्त्रयीमयः। व्यक्ताव्यक्तस्वरूपस्त्वं गुणभृन्निर्गुणः परः।। स्तोतुं च त्वामशक्तोऽहं वेदानामप्यगोचरम् । यच्चापलत्वं कृतवाँस्त्वां युयुत्सुतया प्रभो !।। तत् क्षन्तव्यं त्वया नाथ कृपया केवलेन तु । तव शक्त्या नृपान् सर्वान् जित्वा दत्त्वा महीं द्विजे ।। त्वत्प्रसादवशादेव शान्तिमाप्नोति नैष्ठिकीम् । रामायणेऽपि—"त्रयाणामपि लोकानामादिकर्त्ता वस्यं प्रभुः ।" "ये त्वां देवं ध्रुवं भक्ताः पुराणं पुरुषोत्तमम् । प्राप्नुवन्ति तथा कामानिह लोके परत्र च ।। (लंका काण्ड) श्रीरामस्तवराजेऽपि "देवतिर्यङ्मनुष्याणां दानवानां तथैव च ।।७४।। माता पिता तथा भ्राता त्वमेव रघुवल्लभ । सर्वेषांत्वं परब्रह्म त्वन्मयं सर्वमेव हि ।।७५।।" श्रीरामतापिनी श्रुतिश्च—"सीतारामौ तन्मयावत्र पूज्यौ जातान्याभ्यां भुवनानि द्विसप्त । स्थितानि च प्रहितान्येव तेषु ततो रामो मानवो माययाऽधात् ।। " अत्र धातूनामनेकार्थत्वात् पूज्यावित्यस्य ज्ञेयावित्यर्थो बोध्यः । "तत्सृष्ट्वा तदेवानुप्राविशद्" तिश्रुतिप्रामाण्यान्मानवो नूतनप्रभावान् भगवान् श्रीरामः "माया दम्भे कृपायांचे" ति विश्वकोशवचनबलान्मायया कृपया स्वसृष्टेषु चतुर्दशसंख्याकेषु भुवनेष्वधादन्तर्यामितया प्राविशत् । प्रभवश्च प्रकर्षेण देवाधिपत्यशाली "भूतत्रिनाथं भुवनाधिपत्यं भजामि रामं भवरोगवैद्यम् ।।५७।।" इति श्रीरामस्तवराजवचनप्रामाण्यात् । रामायणेऽपि—"इत्युक्तो लोकपालैस्तैः स्वामी लोकस्य राघवः ।"(लंकाकाण्डे)विश्वाधिकः 'इति रामपदेनासौ परब्रह्माभिधीयते ।।' (रामतापिनी) इति श्रुतिप्रामाण्यात् परब्रह्मतया विश्वस्मादधिकः । निरतिशयबृहत्वशालीत्यर्थः । अत एवोक्तं गीतायां 'विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्" इति । रुद्रो रुद्रशब्दवाच्यः । भगवतः श्रीरामस्य रुद्रशब्दवाच्यत्वं तु द्वितीयमन्त्रस्य भाष्ये सुनिरूपितम् । निरतिशयसर्वज्ञताशालित्वान्महर्षिश्च भगवान् श्रीरामो पूर्वं सृष्ट्यादौ हिरण्यगर्भं लोककर्त्तारं ब्रह्माणं जनयामासोत्पादयामास । "द्विर्बद्धं सुबद्धं भवती"ति न्यायेन सुदृढं करिष्यति ब्रह्मणो भगवतोत्पाद्यमानत्वमग्रेऽपि "यो ब्रह्माणं विदधाति पूर्वम्" इत्येवंरूपेणाभिधास्यन्तीभगवती श्रुतिः । "इन्द्रकर्मा महेन्द्रस्त्वं पद्मनाभो रणान्तकृत् ।" (रामायण लं०)

या ते रुद्र शिवा तनूरघोरा पापकाशिनी ।
तया नस्तनुवा शन्तमया गिरिशन्ताभिचाकशीहि ।।५।।

इत्येवं रूपेण नाभिकमलोद्भवेन ब्रह्मणा भगवतः श्रीरामस्य पद्मनाभत्वमुदीरयता स्वस्य श्रीरामादुत्पन्नत्वमभिहितमेव । "संक्षिप्य हि पुरा लोकान् मायया स्वयमेव हि । महार्णवे शयानोऽप्सु मां त्वं पूर्वमजीजनः ।।" (रामा० उत्तरकाण्डे) इत्येवं रूपेण ब्रह्मणा भगवतः श्रीरामस्य प्रलयकर्तृत्वं क्षीरार्णवशायिरूपधारित्वं स्वस्य जनकत्वञ्च स्पष्टमेव व्याहतम् । स हिरण्यगर्भजनको भगवान् श्रीरामो नोऽस्मान् मोक्षमभिकांक्षमाणान् शुभया सर्वविधदुःखनिवारकत्वप्रयुक्तसर्वोत्कर्षशालिन्या मोक्षहेतुभूतया परमात्मविषयिण्याबुद्ध्यासंयोजयतु ।।४।।

अथ पूर्वोक्ता मोक्षहेतुभूता शुभा बुद्धिः किंविषयिणीत्यवगमयति—येति । हे रुद्र ! दुःखद्रावयितृत्वेन ज्ञानप्रदत्वेन पापिजनरोदयितृत्वेन वा रुद्रपदवाच्य भगवान् श्रीराम ! यद्वा "जगत् सर्वं शरीरं ते" इति रामायणोक्तरीत्या शरीरत्वेन रुद्रविशिष्टतया रुद्रानतिरिक्त भगवन् श्रीराम ! । अत एवोक्तं सनत्कुमारसंहितायाम्—"ब्रह्मा विष्णुश्च रुद्रश्च देवेन्द्रो देवतास्तथा । आदित्यादिग्रहाश्चैव त्वमेव रघुनन्दन" इति । "त्रयाणामपि लोकानामादिकर्त्ता स्वयं प्रभुः । रुद्राणामष्टमो रुद्रः साध्यानामपि पञ्चमः। अश्विनौ चापिकर्णौ ते सूर्याचन्द्रमसौ दृशौ ।" इति । न चैवं विशेषणविशेष्यभूतयो रुद्ररामयोरद्वैतत्वं स्याद्रिति वाच्यम्, विशेषणविशेष्ययोस्तयोर्दण्डपुरुषयोरिव स्वरूपधर्मप्रयुक्तभेदस्य निरूपयितुं शक्यत्वात् । अथ "रुद्रशब्दस्येह न रुद्रवाचकत्वं किन्तु परब्रह्म श्रीरामवाचत्वमेवे"त्यभिप्रायं व्यञ्जयितुं विशेषणान्तरमाह—गिरिशन्तेति । गिरौ शेत इति गिरिशः कैलाशशायी शङ्करः । गिरिशं तनोतीति गिरिशन्तो रुद्रसर्जकस्तत्सम्बुद्धौ हे गिरिशन्त हे शिवसर्जक भगवन् श्रीराम! ते निरुक्तविशेषणविशिष्टस्य तव या " य एषोऽन्तरादित्ये हिरण्मयः पुरुषोदृश्यते हिरण्यश्मश्रुर्हिरण्यकेश आप्रणखात् सर्व एव सुवर्णः" (छा० १ । १ । ६) "रामःकमलपत्राक्षः पूर्णचन्द्रनिभाननः । रूपदाक्षिण्यसम्पन्नःप्रसूतो जनकात्मजे ।। " (रामा० ५ । ३५ । ८) "विपुलांसो महाबाहुः कम्बुग्रीवः शुभाननः । गूढजत्रुः सुताम्राक्षो रामो नाम जनैः श्रुतः । (रामा० ५ ।३५- । १५) इत्यादिश्रुतिस्मृतिविश्रुता अघोरा घोरत्वविहिना । अभयङ्करीत्यर्थः । पापकाशिनी पापकाशनशीला । दर्शनात् पापनाशिनीत्यर्थः । अपापकाशिनीतिच्छेदे तु पुण्यप्रकाशनशीलेत्यर्थोऽवगन्तव्यः । तनूर्देहस्तया शन्तमया सुखप्रदायिन्या तनुवा देहेनाभिचकाशीहि । तादृग्देहविशिष्टरूपेण त्वं प्रकाशितो भवेत्यर्थः ।।५।।

यामिषुं गिरिशन्त हस्ते विभर्ष्यस्तवे ।
शिवां गिरित्र तां कुरु मा हिँसीः पुरुषं जगत् ।६।

ततः परं ब्रह्म परं बृहन्तं यथा निकायं सर्वभूतेषु गूढम् ।
विश्वस्यैकं परिवेष्टितारमीशं तं ज्ञात्वा अमृता भवन्ति ॥७॥

वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात् ।
तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय ॥८॥

अथ दिव्यविग्रहवद् दिव्यायुधध्यायिनां दण्डपरिहारपूर्वकपरिपालनार्थमभ्यर्थयति वेदान्तवेद्यं बाणधारकं भगवन्तं श्रीरामम्—यामिति। हे गिरिशन्त ? हे रुद्रसर्जक ? भगवन् श्रीराम ? त्वं शिवां दिव्यां यामिषुममोघं बाणं बिभर्षि धारयसि । "सर्वशास्त्रार्थतत्त्वज्ञमानन्दकरसुन्दरम् । कौशल्यानन्दनं रामं धनुर्बाणधरं हरिम् ॥ एवं सञ्चिन्तयन् विष्णुं यज्ज्योतिरमलं शिवम् । प्रहृष्टमनसो भूत्वा मुनिवर्यः स नारदः ॥" (सनत्कुमारसंहिता) इत्यादिवचनप्रमाण्याद् हे श्रीराम यममोघं दिव्यं शरं त्वं दधासि । हे गिरित्र ! गिरि भगवन्निश्वासरूपे वेदशिरोभागे वेदान्ते त्रायते प्रतिपाद्यत इति गिरित्रो वेदान्तप्रतिपाद्यस्तत्सबुद्धौ हे गिरित्र ? "वेदान्तवेद्यं कविमीशितारमनादिमध्यान्तमचिन्त्यमाद्यम् । अगोचरं निर्मलमेकरूपं नमामि रामं तमसः परस्तात् ॥" इत्याद्यागमवचनप्रामाण्याद् हे वेदान्तवेद्य श्रीराम ? तां स्वहस्तस्थितां तामिषुं शरमस्तवे त्वत्प्राप्त्यवरोधकक्षेपणाय कुरु विधेहि गच्छतीति जगदिति व्युत्पत्त्या जगत् संसारमार्गे पुनः पुनरतिशयेन वा भ्राम्यमाणं पुरुषं जनं मा हिंसीःसंसारान्धकूपापन्नं माकार्षीरित्यर्थः ॥६॥

अथ पूर्वाभिहितप्रार्थनैव मोक्षजनकध्यानसम्पादिकेति बोधयति—तत इति । ततः परमुक्तविधप्रार्थनाकरणानन्तरं बृहन्तं निरतिशयबृहत्त्वविशिष्टमत एव परं ब्रह्म यथानिकायं पिपीलिकामातङ्गसूक्ष्मस्थूलशरीरानुरूपेण सर्वभूतेषु सर्वप्राणिषु गूढमन्तर्यामितया स्थितम् । सर्वस्यान्तर्व्याप्तमित्यर्थः । विश्वस्याखिलस्यैकं मुख्यं परिवेष्टितारं परिवेष्टनविधातारम् । सर्वस्य बहिर्व्याप्तमित्यर्थः । तं सर्वस्यान्तर्बहिर्व्यापकम् "तस्मिन्नेव श्रिताः सर्वे तदु नात्येति कश्चन" "सर्वभूतात्मभूतस्थं सर्वाधारं सनातनम् । सर्वकारणकर्त्तारं निदानं प्रकृतेः परम्" इत्यादिनिगमागमनिचयप्रतिपादितमीशं नियन्तारं भगवन्तं श्रीरामं ज्ञात्वा विज्ञायामृता अमृतपदमवाप्ताः । जन्ममरणशून्या इत्यर्थः । मुक्ता इति यावत् । भवन्ति । जना इति शेषः ॥७॥

यस्मात् परं नापरमस्ति किञ्चिद् यस्मान्नाणीयो न ज्यायोऽस्ति कश्चिद्
वृक्ष इव स्तब्धो दिवि तिष्ठत्येकस्तेनेदं पूर्णं पुरुषेण सर्वम् ॥९॥

अथ पूर्वमन्त्रोक्तस्य परस्य ब्रह्मणो महापुरुषपदवाच्यतां तज्ज्ञानस्यैव मोक्षसाधनतां चाभिधत्ते—वेदेति । अहमेतं पूर्वमन्त्रोक्तं तमसः तमश्शब्दवाच्यात् प्रकृतिमण्डलात् परस्तात् परात्परसाकेतलोके स्थितमादित्यवर्णं निरतिशयोज्ज्वल्यादिगुणविशिष्टदिव्यमङ्गलविग्रहविशिष्टं महान्तं सर्वथा सर्वतोऽधिकमहत्त्वशालिनं पुरुषं भगवन्तं श्रीरामं वेदावगच्छामि सर्वेश्वरश्रीरामस्य महापुरुषपदवाच्यत्वञ्च 'इति रामपदेनासौ परंब्रह्माभिधीयते' (श्रीरामतापिनी) ''अमोघं देव वीर्यं ते नते मोघाः पराक्रमाः । अमोघं दर्शनं राम अमोघस्तव संस्तवः ॥३१॥ अमोघास्ते भविष्यन्तिभक्तिमन्तो नरा भुवि॥३२॥ ये त्वां देवं ध्रुवं भक्ताः पुराणं पुरुषोत्तमम् । प्राप्नुवन्ति तथा कामानिह लोके परत्र च ॥३३॥ (वाल्मीकिरामायणे ६ ।११७) 'उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः ॥' (गीता१५) 'त्यक्त्वा सुदुस्त्यजसुरेप्सितराजलक्ष्मीं धर्मिष्ठ आर्यवचसा यदगादरण्यम् । मायामृगं दयितयेप्सितमन्वधावद् वन्दे महापुरुष? ते चरणारविन्दम् ॥'(श्रीमद्भागवत-११ स्कन्ध) 'आदिपुरुषः परमपुरुषो महापुरुषएव च । पुण्योदयो दयासारः पुराणपुरुषोत्तमः । स्मितवक्त्रो मितभाषी पूर्वभाषी च राघवः ॥' (पद्मपुराण) 'नतोऽस्मि नित्यं जगदेकनाथमादित्यवर्णं तमसः परस्तात्' ॥६५॥ 'परात्परं यत्परमं पवित्रं नमामि रामं महतो महान्तम् ॥' (६८) 'त्वमक्षरं परं ज्योतिस्त्वमेव पुरुषोत्तमः । त्वमेव तारकं ब्रह्म त्वत्तोऽन्यन्नैव किंचन ॥'' ७६) (श्रीरामस्तवराजः) इत्यादौव्यक्तम् । 'वेदाहमेतमि' ति पुरुषसूक्तानुवादरूपः । पुरुषसूक्तेन तु 'सहस्राक्षः सहस्रपात्' इत्यादिरूपेण महतः पुरुषस्य सहस्राक्षत्वादयः प्रतिपादिताः । ते च सहस्राक्षत्वादयो भगवतो श्रीरामस्य वेदोपबृंहणभूते रामायणे 'सहस्रचरणः श्रीमाञ्शतशीर्षः सहस्रदृक् ।' (युद्धकाण्डे) इत्येवंरूपेण प्रतिपादिता अतोऽत्र महापुरुषपदवाच्यत्वं भगवतो श्रीरामस्यैवास्ति । अत एवोक्तं स्कन्दपुराणे—'यथा पुरुषशब्दोऽयं वासुदेवे प्रतिष्ठितः ।' इति । तमेव महापुरुषपदवाच्यं परं ब्रह्म भगवन्तं श्रीराममेव विदित्वाऽवगम्य । उपास्येत्यर्थः । मृत्युं मृत्युपदवाच्यं संसारमत्येत्यतिक्रामति । अयनाय भगवतः श्रीरामस्यावाप्तये । मोक्षाख्यपरमपददिव्यधाम श्रीसाकेतप्राप्तय इत्यर्थः । अन्य इतरः पन्था मार्गो न विद्यते । नास्तीत्यर्थः । तद् गमनप्रकारञ्च जगदाचार्य श्रीरामेश्वरानन्दाचार्य प्रसादित श्रीरामप्राप्तिपद्धतौ प्रस्फुटम् । अत एवोक्तं श्रीरामस्तवराजे—'त्वमेव तारकं ब्रह्म त्वत्तोऽन्यन्नैव किञ्चन ॥' (सनत्कुमारसंहिता) इति ॥८॥

ततो यदुत्तरतरं तदरूपमनामयम् ।
य एतद् विदुरमृतास्ते भवन्त्यथेतरे दुःखमेवापियन्ति ॥१०॥
सर्वाननशिरोग्रीवः सर्वभूतगुहाशयः ।
सर्वव्यापी स भगवाँस्तस्मात् सर्वगतः शिवः ॥११॥

अथात्मज्ञानस्य मोक्षहेतुतापादिकायाः 'तरति शोकमात्मविद्' इत्येतस्याः श्रुतेरविरोधमापादयितुं व्यापकत्वादादित्यवर्णस्य पुरुषस्यात्मत्वमापादयति—यस्मादिति । 'न तत्समश्चाभ्यधिकश्च दृश्यते' 'न त्वत्समश्चाभ्यधिकः कुतोऽन्यः' ''नेदं यशो रघुपते सुरयाञ्चयाच लीलातनोरधिकसाम्यविमुक्तधाम्नः । रक्षोवधो जलधिबन्धनमस्त्रपुगैः किं तस्य शत्रुहनने कपयः सहायाः'' इत्यादि श्रुतिस्मृतिभ्यां परमपुरुषसमाधिकनिषेधाद् यस्मादपरमन्यत् परमुत्कृष्टं किंचिन्नास्ति यस्माद् यदपेक्षाऽतिसूक्ष्मत्वात् कश्चिदणीयः प्रवेशयोग्यं सर्वव्यापित्वाज्ज्यायोऽधिकं विवृद्धं वस्तु किञ्चिदपि नास्ति । कश्चिदिति छान्दसो लिङ्गव्यत्ययः । अवाप्तसमस्तकामत्वाद् ब्रह्मादिकमपि तृणाय मन्यमानो यश्च दिवि नित्यधामाख्येऽप्राकृते लोके वृक्ष इव तरुरिव स्तब्धोऽप्रणतस्वभावविशिष्ट एको मुख्यः संस्तिष्ठति । अथ 'जीवाम केन' इति चिन्तामपाकर्तुमाह—तेन । तेन पुरुषेण नियमनान्तःप्रविष्टेनादित्यवर्णमहापुरुषपदवाच्येन भगवता श्रीरामेणेदं सर्वं पूर्णं व्याप्तम् । पूर्णमिति व्याप्त्या श्रीरामस्य सर्वात्मत्वाद् 'यस्यात्मा शरीरमि'तिश्रुतेर्देहभूतो जीववर्गः स्वात्मभूतेन श्रीरामेणैव जीवतीति भावः ॥९॥

'वेदाहमेतं पुरुषं महान्तम्' इति मन्त्रे महापुरुषपदवाच्यस्य श्रीरामस्य ज्ञानमेव मोक्षसाधनं नान्यदित्युपदिष्टं तदुपपादयन् 'यस्मात् परं नापरमस्ति किञ्चित्'इत्यनेन महापुरुषस्यैव परत्वं नान्यस्येति प्रतिपाद्य पूर्वोक्तमर्थं हेतुतो निगमयन्नाह—ततो यदुत्तरतरमिति । यद् उत्तरतरमुत्कृष्टतरं महापुरुषपदवाच्यं श्रीरामतत्त्वं यतस्तदेवारूपं कर्मकृतरूपशून्यमनामयं दुःखशून्यं चास्ति, ततस्तस्माद्धेतोर्ये एतन्महापुरुषपदवाच्यं श्रीरामतत्त्वं विदुरुपासते तेऽमृता भवन्ति । त एवामृता जननमरणशून्या भवन्तीत्यर्थः । अथेति पक्षान्तरे । ये त्वेतच्छ्रीरामतत्त्वं न विदुस्ते दुःखमेवापियन्ति प्राप्नुवन्ति । यद्वा 'तेनेदं पूर्णं पुरुषेण सर्वम् ।' इति पूर्वोक्तं सर्वशब्दवाच्यं जगत् तच्छब्देन परामृश्य ततः सर्वशब्दवाच्याज्जगतो यदुत्तरतरमित्यन्वयः कर्तव्योऽन्यत् सर्वं तु पूर्ववदेव बोध्यम् ॥१०॥

अथ 'तेनेदं पुरुषेण सर्वम् ' इति सर्वव्यापित्वेन महापुरुषस्य हेयसम्बन्धशङ्का-

महान् प्रभुर्वै पुरुषः सत्त्वस्यैव प्रवर्त्तकः ।
सुनिर्मलामिमां शान्तिमीशानो ज्योतिरव्ययः ॥१२॥

मपाकरोति–सर्वाननशिरोग्रीव इति । यतः स महापुरुषः सर्वव्यापी ततो सर्वेषामाननानि शिरांसि ग्रीवाश्च तस्यैव सन्तीति स सर्वाननशिरोग्रीवोऽस्ति यद्वाऽऽनन्त्यार्थकोऽत्र सर्वशब्दस्तस्मादनन्तान्याननानि शिरांसि ग्रीवाश्च सन्ति यस्य सर्वाननशिरोग्रीवः सोऽस्ति । सर्वेषां भूतानां गुहायां हृदयलक्षणायां शेत इति सर्वभूतगुहाशयश्चापि सोऽस्ति । 'अङ्गुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठति । ईशानो भूतभव्यस्य ।' (का० ४।२।१२) 'ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति'(गीता) 'जगत् सर्वं शरीरं ते'(रामायण) इत्यादिश्रुतिस्मृत्योऽत्र प्रामाण्यमुपयान्ति । महापुरुषस्य श्रीरामस्य सर्वभूतशरीरत्वसर्वभूतगुहाशयत्वसर्वव्यापित्वेषु सत्स्वप्यनामयत्वस्यासम्भवस्तु नास्ति यतो महापुरुषपदवाच्यः श्रीरामो भगवान् भगो विद्यते यस्य तादृशोऽस्ति 'ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः । ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणा ॥' 'ज्ञान-शक्तिबलैश्वर्यतेजोवीर्याण्यशेषतः । भगवच्छब्दवाच्यानि विना हेयैर्गुणादिभिः ॥' इत्यादिवचनप्रामाण्यादैश्वर्यादयो ज्ञानादयो वा भगशब्दवाच्या बोध्याः । यतो महा-पुरुषपदवाच्यः श्रीरामस्तस्मात् सर्वगतोऽपि स शिवःशुद्ध योऽसौ सर्वतनुः सर्वः सर्वनामा सनातनः । अलिप्तःसर्वभावेषु श्रीरामः शरणं मम ॥ इत्यागमोक्तेः सर्वविधहे-यसम्बन्धविवर्जितःसोऽस्तीति भावः । तदुक्तं भगवता बादरायणेनापि ,सम्भो गप्राप्तिरिति चेन्न वैशेष्यात्' (ब्रह्मसूत्र १।२।८) इति । एवं स्थिते "तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीति" (श्वेता०४।६) इतिश्रुतिर्जीवस्य पुण्यपापरूपकर्म-परवशत्वेन सुखदुःखोपभोगमपहतपाप्मनः परमात्मनस्तन्निवृत्तिञ्चाभिधत्ते ॥११॥

अथोक्तस्य महापुरुषस्य सत्त्वप्रवर्त्तकतामभिधत्ते–महानिति । अवधारणार्थको वै शब्दः । महान् पुरुष एव प्रभुः फलदाने समर्थः । उक्तञ्च सनत्कुमारसंहितायाम्–'भक्तप्रियं पद्मनेत्रंभक्तानामीप्सितप्रदम् । ' (रामस्तवराजः) इति । 'जायमानं हि पुरुषं यं पश्येन्म धुसूदनः । सात्त्विकः स तु विज्ञेयः स वै मोक्षार्थचिन्तकः" इत्येवंरूपेण मोक्षजनक-ज्ञानहेतोः सत्त्वस्य सत्त्वगुणस्य स्वकटाक्षेण प्रवर्त्तकः स एव महापुरुषोऽत एव ज्योतिरादित्यादिप्रकाशकज्योतिस्वरूपः । एतेन महापुरुषस्य निरतिशयदीप्तिविशिष्टादि-त्यवर्णविग्रहत्वमावेदितं वेदितव्यम् । अव्ययोऽविनाशिस्वरूपो भगवानेव सुनिर्मलाम-ज्ञानदुःखादिमलशून्यामिमां मुक्तिरूपां जन्ममरणाद्युपशमात्मिकां शान्तिमीशानः ।

अङ्गुष्ठमात्रः पुरुषोऽन्तरात्मा सदा जनानां हृदये सन्निविष्ठः।
हृदा मनीषा मनसाभिक्लृप्तो य एतद्विदुरमृतास्ते भवन्ति ॥१३॥
सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्।
स भूमिं विश्वतो वृत्वाऽत्यतिष्ठद्दशांगुलम् ॥१४॥

ईष्ट इत्यर्थः 'तं देवतानां परमं च दैवतं तमीश्वराणां परमं महेश्वरम्' वन्दामहे महेशानं चण्डकोदण्डखण्डनम्। जानकीहृदयानन्दं चन्दनं रघुनन्दनम् ॥५३॥ इत्यादिश्रुतिस्मृतयोऽत्र प्रमाणतामुपयान्ति ॥१२॥

अथोक्तस्य सर्वभूतगुहाशयस्य महापुरुषस्यांगुष्टपरिमाणत्वमाह—अंगुष्ठमात्र इति। अंगुष्ठेन अंगुष्ठपरिमितहृदयेन मीयमानत्वादंगुष्ठमात्रे। जानानां हृदये सदान्तरात्मा सन्निविष्टः सम्यग् रूपेण स्थितः पुरुषो महापुरुषपदवाच्यो भगवाञ्श्रीरामो हृदा भक्त्या मनीषा धृत्या संयुतेन मनसाऽभिक्लृप्तो ग्रहणार्हः। य एतद् विदुरमृतास्ते भवन्तीति पूर्ववद् व्याख्येयम् ॥ १३॥

अथ पुरुषस्याङ्गुष्ठमात्राभिधानेन प्राप्तस्य परिच्छिन्नत्वभ्रमस्य निरासं करोति सहस्रेति। अत्र सहस्रशब्द आनन्त्यार्थकः सहस्राण्यनन्तानि शिरांसि यस्य स सहस्रशीर्षोऽनन्तशीर्षः। अत्र 'शीर्षन् छन्दसि' इत्यनेन शिरसः शीर्षनादेशः। एवं 'सहस्राक्षः 'सहस्रपात्' इत्यादौ विग्रहः कार्यः। सहस्राक्ष इत्यत्राक्षशब्दो ज्ञानेन्द्रियमात्रोपलक्षकः। सहस्रपादित्यत्र पादशब्दः कर्मेन्द्रियमात्रोपलक्षकः। तथा च सहस्राक्षसहस्रपाच्छब्दाभ्यां ज्ञानशक्त्योरानन्त्यमुक्तं भवति। पुरुषः "पूर्वमेवाहमिहासमिति। तत् पुरुषस्य पुरुषत्वम्' इति श्रुत्या जगत् कारणरूपेण पूर्वं वर्तमानत्वात् 'तेनेदं पूर्णं पुरुषेण सर्वम्' इति श्रुत्या पूर्णत्वाद्वा 'पुरमाक्रम्य सकलं शेते यस्मान्महाप्रभुः। तस्मात् पुरुष इत्येष प्रोच्यते तत्त्वचिन्तकैः ॥' इति विष्णुस्मृतिवचनेन शरीराख्ये पुरे शयनाद्वा बहूनां बहुभिर्भजनाद्वा 'भगवानिति शब्दोऽयं तथा पुरुष इत्यपि। निरुपाधी च वर्त्तेते वासुदेवे सनातने ॥ सर्वलोकप्रतीत्या च पुरुषः प्रोच्यते हरिः। तं विना पुण्डरीकाक्षं नान्यः पुरुषशब्दभाक्" ॥ इति पद्मपुराणवचनाद्वा 'असौ रामो महाबाहुरतिमानुषचेष्टया। तेजो महत्तया वाऽपि संस्मारयति पूरुषम् ॥' इत्युत्तररामायणस्थागस्त्यवचनाद्वा 'त्वमक्षरं परं ज्योतिस्त्वमेव पुरुषोत्तमः' इति सनत्कुमारसंहितावचनप्रामाण्याद्वा पुरुषः पुरुषशब्दवाच्योऽनन्तज्ञानशक्तिसम्पन्नो भगवान् श्रीरामः 'अनन्तबाहूदरवक्त्रनेत्रम्' इत्यादिवचनानुसारेणानन्तशिरआद्यङ्गैर्विराड्रूपीसन् भूमिं भूमिशब्दवाच्यमखिलं ब्रह्माण्डं

पुरुष एवेदं सर्वं यद्भूतं यच्च भाव्यम्।
उतामृतत्वस्येशानो यदन्ने नातिरोहति ॥१५॥
सर्वतः पाणिपादं तत् सर्वतोऽक्षिशिरोमुखम् ।
सर्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठति ॥१६॥

विश्वतः सर्वतो भूत्वा व्याप्य । दशाङ्गुलमित्यत्राङ्गुलशब्दोऽवयवार्थकः । तथा च पञ्चभूतपञ्चतन्मात्ररूपदशावयवयुक्तं निखिलं ब्रह्माण्डमतिक्रम्य परात्परे स्वधाम्नि स्थितः । तथा च पुरुषशब्दवाच्यस्य सर्वेश्वर श्रीरामस्य न परिच्छिन्नत्वं किन्त्वपरिच्छिन्नत्वमेवेति बोध्यम् ॥१४॥

अथ परब्रह्मणो भगवतः श्रीरामस्योभयविभूतिस्वामित्वमभिधत्ते—पुरुष एवेत्यादिना। यद् भूतं भूतकालिकं यच्च भाव्यं भविष्यत्कालिकं यच्चेदं वर्त्तमानकालिकं तत् सर्वं कृत्स्नं प्रपञ्चजातं पुरुष एव पुरुषशब्दवाच्यभगवच्छ्रीरामात्मकमेव । अत्र सामानाधिकरण्येन व्यपदेशः "ग्रामोऽयं देवदत्तः" इतिवत् प्रपञ्चपुरुषयोरीशेशितव्यभावात् "पानीयं प्राणिनां प्राणः" इतिवत् तयोः कार्यकारणभावाद् वा बोध्यः । एतेन सर्वशरीरकस्य भगवतः श्रीरामस्य लीलाविभूतीशत्वमभिहितम् । न च भगवतः प्रपञ्चशरीरकत्वे "अशरीरं शरीरेषु" इत्यशरीरश्रुतिविरोधः स्यादिति वाच्यम्, अशरीरश्रुतेः कर्मकृतशरीरनिषेधकत्वांगीकारेणादोषात् । ननु भगवतः शरीरेऽङ्गीकृतेतत्प्रयुक्तसुखदुःखभोगोऽपि प्रसज्येतेति चेन्न, ऐहिकसुखदुःखादिभोगस्य कर्मनिबन्धनत्वेनेश्वरस्य कर्माभावेन दोषाभावात् । अथ भगवतो नित्यविभूतीशत्वमभिधत्ते—उतामृतत्वस्येत्यादिना । अर्थान्तरवाचक उतशब्दः । अमृतत्वस्य न विद्यते मृतत्वं यत्र तदमृतत्वं यत्र तदमृतत्वं परमधाम तस्यामृतत्वस्येशानो नियन्ता स्वामीत्यर्थः । तद्विशेषयति—यदन्नेनातिरोहतीति। यत् परमं धामान्ने प्रकृतिप्राकृतसम्बन्धे सति नातिरोहति नोत्पन्नो भवति । भक्त्या कर्मण्यश्लिष्टे विनष्टे च सत्येव भगवानमृतपदं ददातीत्यर्थः । तदुक्तं मोक्षधर्मे—"अन्नाज्जातस्य भूतस्य मनुष्यादेरकारणात् । निर्वाणदायी भवति कृपया पुरुषोत्तमः ॥" इति ॥१५॥

अथ भगवतः सर्वशरीरावयवादिकार्यकारित्वं सर्वमावृत्यावस्थायित्वं चाभिधत्ते—सर्वत इति । तत् पूर्वाभिहितं पुरुषतत्त्वं सर्वतः पाणिपादं पाणिपादक्रियाकारकं सर्वतश्चाक्षिशिरोमुखं नयनाननशिरः प्रयुक्तकार्यकृत् सर्वतश्च श्रुतिमच्छ्रवणेन्द्रियजन्यकार्यविधायकं

सर्वेन्द्रियगुणाभासं सर्वेन्द्रियविवर्जितम् ।
सर्वस्य प्रभुमीशानं सर्वस्य शरणं सुहृत् ॥१७॥

नवद्वारे पुरे देहि हंसो लेलायते बहिः ।
वशी सर्वस्य लोकस्य स्थावरस्य चरस्य च ॥१८॥

लोके जगति सर्वपदार्थजातावृत्य व्याप्य तिष्ठत्यवतिष्ठते । उक्तं च श्रौतप्रमेयचन्द्रिकायामाचार्यवर्यैः श्रीश्रियानन्दाचार्यैः—

'स्वया च प्रभया सर्वान् यतश्चावृत्य तिष्ठति ।
श्रीमद्रामस्ततश्चैव सर्वात्मत्वेन सम्मतः ॥" इति ॥१६॥

सर्वेन्द्रियेति—सर्वेषां ज्ञानकर्मेन्द्रियत्वभेदभिन्नानामिन्द्रियाणां मनः श्रोत्राद्येकादशसंख्याकानाममुख्यप्राणानां गुणैस्तत्तदिन्द्रियजन्यज्ञानैराभासो बाह्यविषयग्रहोयस्य तत् सर्वेन्द्रियगुणाभासं मनःश्रोत्रादिनिखिलेन्द्रियवृत्त्याऽवबोधितुं समर्थम् । तत्रसर्वेन्द्रियशालित्वमप्यैच्छिकमेव न तुस्वाभाविकमत आह सर्वेन्द्रियविवर्जितमिति । तज्ज्ञानस्येन्द्रियानधीनत्वादिन्द्रियवृत्तिं विनाप्यखिलवगन्तुं समर्थमितिभावः । सर्वस्याखिलस्य प्रभुं पतिंविश्वस्येतिश्रुतेः सर्वस्वामिनम् परिचर्याफलप्रदायकमित्यर्थः । ईशानं नियामकम् । सर्वस्य शरणं निखिलभूतरक्षकम् । उक्तं च श्रीमद् वाल्मीकीये रामायणे युद्धकाण्डे चतुर्मुखेन—

"इन्द्रकर्मा महेन्द्रस्त्वं पद्मनाभो रणान्तकृत् ।
शरण्यं शरणं च त्वामाहुर्दिव्या महर्षयः ॥"

सुहृत् सर्वदा सर्वथा च हितकरम् । बृहदितिपाठे गुणतः स्वरूपतः शरीरेण च सर्वेभ्यो महदित्यर्थः । उक्तं च श्रौतप्रमेयचन्द्रिकायां सिद्धान्तविजयिभिर्जगद्गुरुश्रीश्रियानन्दाचार्यैः—"बृहत्वाद् बृंहणत्वाच्च रामो ब्रह्मतयेरितः ॥'

भगवच्छ्रीबोधायनसम्पादितस्य वेदरहस्यस्य रहस्यमार्त्तण्डभास्ये दुर्वादध्वान्तमार्त्तण्डैर्जगद्गुरुभिः श्रीराघवानन्दाचार्यैसमुद्धृतं च श्रीरामब्रह्मप्रतिपादकं बोधायनमतादर्शवचनम्—"आ सर्वत अन्तर्बहिश्चेत्यर्थः । वितते व्याप्ते, तथोक्तं बोधायनमतादर्शे "अन्तर्बहिर्जगत् सर्वं व्याप्य रामो हि संस्थितः । अनेन संवृतं ह्यन्तर्बहिः सर्वं तथान्तरम् ॥" इति ॥१७॥

ननु 'सर्वतः पाणिपादं तत्' इत्यादिमन्त्रेण यथा भगवतः सर्वतः पाणिपादत्वादिकमुक्तं तथैव गीतायास्त्रयोदशाध्यायस्य चतुर्दशेश्लोके 'सर्वतः पाणिपादं तत्' इत्येवंरूपेण

अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्णः ।
स वेत्ति वेद्यं नच तस्यास्तिवेत्ता तमाहुरग्र्यं पुरुषं महान्तम् ॥१९॥

परिशुद्धस्यात्मनश्चापि भगवता सर्वतः पाणिपादत्वादिकमुक्तम् । ततश्च 'सर्वेन्द्रियगुणाभासं सर्वेन्द्रियविवर्जितम् । सर्वस्य प्रभुमीशानं सर्वस्य शरणं सुहृत्' (श्वेताश्वतर० ३।१७) इति मन्त्रोक्तं सर्वस्य प्रभुत्वेशानत्वादिकमपि परिशुद्धात्मस्वरूपस्यैव स्यादिति चेन्न, 'नवद्वारेपुरे देही'त्यादिमन्त्रेण नवद्वारपुरे परिभ्रमणोक्त्या हंसशब्देनाभिहितस्य जीवस्य पुण्यपापकर्मपरतन्त्रोक्तेः । तथाहि—नवद्वारे शिरसि सप्त पायूपस्थयोश्चद्वे इति नवसंख्याकानि मलस्रावकानि द्वाराणि यस्मिन् तस्मिन् पुरे पुरवत् स्वात्यन्तभिन्ने देहे देही शरीरी हंसो हन्ति गच्छति नानादेहमिति हंसोहंसशब्द वाच्यो जीवो लेलायते स्वकृतपुण्यापुण्यकर्मपराधीनतया परिभ्रमतीत्यतस्तस्य सर्वप्रभुत्वेशानत्वादौ न शक्तिः किन्तु ततोबहिर्बाह्यः परमात्मैव सर्वस्य स्थावरस्य चरस्य च लोकस्य वशीवशकर्त्ता प्रभुरित्यर्थः ॥१८॥

अथ जीवादीशस्य विशिष्टतामाह—अपाणिपाद इति । न विद्यन्ते पाणिपादा यस्य सोऽपाणिपादः पाणिपादरहितोऽपि स ईश्वरो जवनोवेगशाली । वेगेन गतिमानित्यर्थः। ग्रहीता ग्रहण कर्त्ता । ईश्वरस्य वेगेन गमनं ग्रहणं च पाणिपादानपेक्षमस्तीत्यर्थः । एतच्चान्यकर्मेन्द्रियाणामुपलक्षणम् । ईश्वरस्य सर्वं कर्म सङ्कल्पाधीनत्वादस्य कर्मेन्द्रियानपेक्षमस्तीति यावत् । न विद्यते चक्षुर्यस्यसोऽचक्षुः सन्नपि स पश्यति । ईश्वरस्य चाक्षुषं ज्ञानं चक्षुरिन्द्रियानपेक्षमस्तीत्यर्थः । न विद्येते कर्णौ यस्य सोऽकर्णः । अथापि स शृणोति । ईश्वरस्य श्रावणं ज्ञाणं श्रवणाधीनं नास्तीत्यर्थः । अत्रापि चक्षुरादिसर्वेषां ज्ञानेन्द्रियाणामुपलक्षणं बोध्यम् ।ईश्वरस्य सर्वज्ञानं ज्ञानेन्द्रियानपेक्षमवगन्तव्यम् । स च सर्वमखिलं वेद्यं वस्तु वेत्ति जानाति किन्तु स्वरूपेण गुणैश्च सर्वेभ्योवेद्येभ्यो विलक्षणत्वात् कार्त्स्न्येन तस्यवेत्ता कश्चिदपि नास्ति । वेदावेदज्ञा वा तमग्रयमग्रगण्यं सर्वश्रेष्ठं महान्तं पुरुषमाहु,'वन्दे महापुरुष ! ते चरणारविन्दम्'' इत्यादिरूपेणाहुः । ''उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः ।'' इत्येवं रूपेण गीतायां भगवताप्युक्तम् । सिद्धसम्राड् जगद्गुरु श्रीराघवानन्दाचार्यदुर्वादिध्वान्तमार्त्तण्डैरपिचोक्तं श्रीराघवेन्द्रमङ्गलमालयाम्— ''पुरुषायोत्तमायाथ क्षराक्षरपराय च । परमात्माभिधानाय राघवेन्द्रायमङ्गलम् ।।''इति१९

अणोरणीयान् महतोमहीयानात्मा गुहायां निहितोऽस्य जन्तोः ।
तमक्रतुं पश्यति वीतशोको धातुः प्रसादान्महिमानमीशम् ॥२०॥
वेदाहमेतमजरं पुराणं सर्वात्मानंसर्वगतं विभुत्वात् ।
जन्मनिरोधं प्रवदन्ति यस्य ब्रह्मवादिनोहि प्रवदन्ति नित्यम् ॥२१॥

इति श्वेताश्वतरोपनिषदि तृतीयोऽध्यायः ॥३॥

अथ वीतशोकत्वावाप्तेर्हेतुमाह—अणोरणीयानिति । अणोरणुपरिमाणविशिष्टात् पदार्थादप्यणीयानणुपरिमाणशाली । निखिलसूक्ष्मपदार्थान्तः प्रवेशयोग्यसूक्ष्मत्वविशिष्ट इत्यर्थः । सर्वेभ्योऽणुपदार्थेभ्योऽणुतम इति यावत् । तथात्वेऽपि महतः सकलमहत् परिमाणविशिष्टेभ्योमहीयान् महत् परिमाणविशिष्टः । निरतिशयबृहत्त्वविशिष्ट इत्यर्थः । इत्थम्भूतोऽपि परमात्मा श्रीरामोऽस्य जन्तोर्जीवस्य । जन्तोरित्येकवचनं जात्यभिप्रायेण सर्वस्य जीवव्रातस्यात्मा प्रेरकोऽस्य जीववर्गस्य गुहायाँहृदयगुहायां निहितः स्थितोऽस्ति प्रेरकतयास्थित इत्यर्थः । तं तादृशमक्रतुमकर्माणम् । कर्मकर्तृत्वशालित्वेऽपि तदनासक्तिमत्तया कर्मलेपशून्यमित्यर्थः । महन् महिमविशिष्टमिति यावत् । धातुर्जगद्धारकस्य जगत् पालकस्य वा परब्रह्मणः श्रीरामस्य प्रसादात् । ईशं सर्वेश्वरं भगवन्तं श्रीराममस्य महिमानमखिलजगन्नियमनरूपं यदा पश्यत्यवलोकयति तदा वीतशोको गतशोकः । क्लेशशून्य इत्यर्थः । भवतीति शेषः ॥२०॥

अथ प्रागुक्तं वक्तव्यार्थं निगदयति—वेदाहमिति । 'अजायमानो बहुधाभिजायते 'नित्यो नित्यानं चेतनश्चेतनानामि'त्यादि यस्य विभुक्ताज्जन्म निरोधं कर्मप्रयुक्तजन्माभावं प्रवदन्ति प्रकर्षेण कथयन्ति । अहमेतं विभुत्वात् सर्वगत ''अन्तः प्रविष्टः शास्ता जनानाति''ति श्रुतिप्रमाणितं सर्वान्तर्यामिणमजरं जरारहितं पुराणं पुरातनं सर्वात्मानं वेदेत्येतादृशं 'रमन्ते योगिनोऽनन्ते नित्यानन्ते चिदात्मनि । इति रामपदेनासौ परब्रह्माभिधयिते ॥६॥ (श्रीरामपूर्वतापनीयोपनिषत्) इति श्रुतिप्रमाणितस्य स्वरूपगुणादिभिर्बृहत्तमस्य परब्रह्मणो भगवतः श्रीरामस्य वदनशीला महात्मानो नित्यं प्रवदन्ति ॥२१
इति श्वेताश्वतरोपनिषदो भगवच्छ्रीरामानन्दाचार्यप्रणीतानन्दभाष्येतृतीयोऽयायः ॥३॥

॥ अथ चतुर्थोऽध्यायः ॥

य एकोऽवर्णो बहुधाशक्तियोगाद् वर्णाननेकान् निहितार्थो दधाति
विचैति चान्ते विश्वमादौ स देवः स नो बुद्ध्या शुभया संयुनक्तु ॥
तदेवाग्निस्तदादित्यस्तद्वायुस्तदुचन्द्रमाः ।
तदेव शुक्रं तद् ब्रह्म तदापस्तत् प्रजापतिः ॥२॥
त्वं स्त्री त्वं पुमानसि त्वं कुमार उत वा कुमारी ।
त्वं दण्डेन वञ्चसि त्वं जातो भवति विश्वतोमुखः ॥३॥

अथ "द्यावाभूमी जनयन् देव एकः" इति देवशब्देनाभिहितस्य "भवान्नारायणोदेव" इतिश्रीमद्रामायणवचनप्रमाणितस्य "इति रामपदेनासौ परब्रह्माभिधीयते" इति श्रीरामतापनीयश्रुतिप्रमाणितस्य परब्रह्मणो भगवतः श्रीरामस्य "यस्यात्मा शरीरं यस्य पृथिवी शरीरं", 'सर्वात्मा' जगत्सर्वं शरीरं ते" इत्याद्यनेकश्रुतिस्मृतिप्रमाणितं सर्वात्मत्वं "पतिं विश्वस्य" इत्यादि श्रुत्यापादितं सर्वस्वामित्वं "यतो वा इमानि भूतानि जायन्ते" इत्यादिश्रुतिप्रतिपादितं सर्वकारणत्वं च प्रतिपादयिष्यन् तद्विषयिणीं बुद्धिं प्रार्थयति—य एक इति । य एको मुख्योऽवर्णः । अवतीति अः, रक्षकः । आप्नोतीति अः, व्यापकः । वर्ण्यते प्रतिपाद्यते इति वर्णः 'सर्वेवेदा यत्पदमामनन्ति' इतिश्रुतिप्रतिपादितः । अश्चासौ वर्णश्चावर्णः सर्वेषां रक्षको व्यापकः सर्वश्रुतिप्रतिपादितश्च यः । अर्थ्यन्त इत्यर्थाः पदार्थाः । निहिता सूक्ष्मरूपेण रक्षिता निखिलपदार्था यस्मिन् स निहितार्थः सूक्ष्मरूपेण स्वस्मिन् स्थापितसर्वपदार्थः । बहुधा शक्तियोगादुत्पादकत्वादिशक्तिवैशिष्ट्यादादौ सृष्टिकालेऽनेकान् वर्णान् पदार्थान् दधाति धारयति पोषयति च । अन्ते प्रलयकाले च विश्वं विचैति स्वस्मिन्नदर्शनं च गमयति । एवंभूतो यो देवः सृष्ट्यादिलीलाविधायकः स भगवान् श्रीरामेनोऽस्मान् शुभया बुद्ध्या संयुनक्तु शुभबुद्धिविशिष्टान् विदधातु ॥१॥

तदेवाग्निरिति । तदेव परब्रह्म स एव परब्रह्माख्यः श्रीरामोऽग्निरादित्यो वायुश्चन्द्रमाः शुक्रं प्रकाशविशिष्टनक्षत्रमण्डलमापः प्रजापतिर्ब्रह्माचास्ति । अग्न्यादिष्वन्तरात्मरूपेण वर्त्तमानतया सर्वेश्वरश्रीरामस्यैवाग्न्यादितत्तच्छब्दवाच्यता बोद्ध्येत्यर्थः । योऽसौसर्वतनुः सर्वः सर्वनामा सनातनः । अलिप्तः सर्वभावेषु श्रीरामः शरणं मम" इत्यागमोक्तेः ॥२॥

नीलः पतङ्गो हरितो लोहिताक्षस्तडिद्गर्भ ऋतवः समुद्राः ।
अनादिमत् त्वं विभुत्वेन वर्त्तसे यतो जातानि भुवनानि विश्वा ॥
अजामेकां लोहित शुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपाः ।
अजोह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः ॥५॥

अथ परब्रह्मणो भगवतः श्रीरामस्योक्तमेव सर्वात्मत्वं सम्बोधनद्वाराऽभिदधाति त्वंस्त्रीति । हे देव भगवन् श्रीराम ! अग्न्याद्यन्तरात्मतयावर्त्तमानस्त्वं त्वमेव स्त्री असि स्त्रीत्वविशिष्टान्तरात्मतया वर्त्तमानोऽपि त्वमेवासीत्यर्थः । त्वं त्वमेव पुमानसि, पुंस्त्व-विशिष्टान्तरात्माऽपि त्वमेवासीत्यर्थः । त्वं कुमारः कुमारत्वविशिष्टान्तरात्मा उत अपि त्वं त्वमेव कुमारी कुमारीत्वविशिष्टान्तरात्मावा चासि । जीर्णोजीर्णत्वावस्थापन्नो वृद्धा-त्मासन् दण्डेनावलम्बभूतेन लगुडेन वञ्चसि सञ्चरस्यपि त्वं त्वमेव । अत्यल्पमिदमुक्तं सर्वात्मत्वेन सर्वगतत्वात् विश्वतोमुखः सर्वरूपेण जातस्त्वमेवासि । आख्यातञ्च परि-पूर्णब्रह्मणो भगवतः श्रीरामस्य विश्वरूपत्वं श्रीरामस्तवकलानिधौ बोधायनवृत्तिकार-जगद्गुरु श्रीपुरुषोत्तमाचार्यकृपापात्रैर्यतिसम्राट्जगद्गुरुश्रीगङ्गाधराचार्यदेवैः—

"सुरध्येय? नमस्तेऽस्तु योगिध्येय?नमोऽस्तुते।मुनिध्येयनमस्तेऽस्तु श्रीरामायनमोऽस्तुते नमस्ते विश्वरूपाय नमस्ते विश्वहेतवे। नमस्ते विश्ववन्द्याय नमस्ते विश्वरक्षक ? ॥४॥

अपरयाज्ञवल्क्यजगद्गुरुश्रीश्रुतानन्दाचार्यवेदविद्यानिधिभिर्भगवतः श्रीरामचन्द्रस्य सर्वा-त्मत्वमभिहितञ्चोपेयोपायदर्पणे—

"करणेशेशरामश्चानेन जीवेन चात्मना । सृष्ट्वा विश्वं प्रविश्यान्तर्विश्वेषां प्रेरकस्तथा ।
सर्वात्मा सर्वदेहश्च सर्वाराध्यश्च सर्वदः। सर्वशक्तिश्च सर्वेशः सर्ववित् सर्वकृत् तथा ॥"

इति ॥३॥

नील इति । त्वमिति पदं सर्वत्रसम्बध्यते । हे भगवन् श्रीराम ! नीलः कृष्णवर्णः कोकिलादिर्हरितो हरितवर्णः शुकादिर्लोहिताक्षो राजहंसादिः पतङ्गः पक्षिविशेषः । त्वमे-वासि । तडिद्गर्भेऽस्यासौ तडिद्गर्भोमेघस्त्वमेवासि । ऋतवो वसन्तादय ऋतवस्त्व-मेवासि । समुद्राः सागरा अपि त्वमेवासि । अत्र सर्वत्र सामानाधिकरण्यं शरीरात्म-भावनिबन्धनं बोध्यम् । यतो यस्माद् विश्वानि सर्वाणि भुवनानि भूरादीनि जाता न्युत्पन्नानि तदनादिमदादिरहितं सर्वकारणभूतं च त्वमेवासि । हे भगवन् श्रीराम ! त्वं विभुत्वेन वर्त्तसे । त्वमेव समस्तचिदचित्पदार्थानभिव्याप्य तिष्ठसि । सर्वव्यापक-स्त्वमेवासीत्यर्थः ॥४॥

द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते ।
तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीति ॥६॥
समाने वृक्षे पुरुषोनिमग्नोऽनीशया शोचति मुह्यमानः ।
जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोकः ॥७॥

पूर्वप्रकरणप्रदर्शितचिदचिद्विवेकं "क्षरं प्रधानममृताक्षरम्, भोक्ताभोग्यं प्रेरितारञ्च मत्वा" इत्यादिकं स्फोरयन्नाह अजामेकामित्यादि । तेजोजलपृथिवीरूपेण परिणामाद्रक्तश्वेतकृष्णस्वरूपवतीमजांस्वसमानानेकप्रजोत्पादयित्रीं जन्मरहितप्रकृतिं स्नेहेन सेवमान एकोऽजन्मा जीवस्तत्रानुरक्तोभवन्नवतिष्ठते। अन्यो भगवच्छरणापत्यासञ्जात वैराग्योऽजन्माजीवो भुक्तभोगां तां परित्यजतीत्यर्थः ॥५॥

जीवस्य प्रकृतिसम्बन्धराहित्येसत्यपिस्वभावतया कर्मफलभोक्तृत्वं न तु ब्रह्मण इतिनिदर्शनतयाऽवतारयति द्वासुपर्णेत्यादि। युक्छब्दो गुणवचनपरो युज्यत इति व्युत्पत्तेः सखायौ अपृथक् भूतसम्बन्धेन परस्परसंमिलितौ जीवपरमेश्वरौ संचलनसाधनतयापर्ण शब्दव्यवहृतपक्षतुल्यज्ञानादिगुणत्वेनतुल्यौ समानमेकं वृक्षं वृक्षतुल्यसंछेदनविषयभूत षाड्कौशिकदेहसमवस्थितौ जीवेशावित्यर्थः । तयोरन्योजीवः पूर्वानेकभवोपार्जितस्वकर्मफलभूतं फलोपधायोन्मुखंपिप्पलमश्वत्थवृक्षफलवत्परिपक्वतयास्वादु बद्धतयाऽज्ञान विजृम्भितत्वेनस्वादुबुद्धियुक्तः स्वस्यैवकर्मफलंभुनक्ति । अन्यः सर्वजननियन्ताऽपहत पाप्मत्वाद्यनेकगुणगणमहिमावान् सर्वेश्वरश्रीरामोजीवेनविनाभूतत्वेऽपितत्संश्लिष्टकर्मफलमनश्नन्नेवाभिचाकशीति समभिवर्तत इत्येतत् । धातूनामनेकार्थत्वात्प्रेरयति सर्वजीवान् स्वकर्मफलभोगायेत्यर्थः । प्रकृतमन्त्रे 'तयोरन्योऽनश्नन्नन्यः' इत्युक्त्या जीवपरमात्मनः सर्वथा भेदः प्रदर्शितस्ततश्च जीवात्मा परमात्मा श्रीरामापेक्षयाऽत्यन्तं भिन्न इति दृढीकृतं भगवत्या श्रुत्या। ततश्चेतरमताभ्युपगतं जीवब्रह्मणोरैक्यं निरस्तमवगन्तव्यं श्रुति विरोधात् ॥६॥

पूर्वमन्त्रोपदिष्टं प्रस्फोरयति समान इत्यादि । पूर्वमन्त्रप्रतिपादितशरीररूपैक वृक्षेसमासक्तः पुरुषो जीवात्मा निमग्नः "पराभिध्यानात्तुतिरोहितं ततो ह्यस्य बन्धविपर्ययौ" (३।२।४) इति परमार्षन्यायेनावबोधितपरमपुरुषात्मशेषत्वज्ञानानन्दत्वादिस्वरूपोभूत्वा 'स्थूलोऽहम्' 'कृशोऽहम्' इत्यादिरूपेण तादात्म्यतयाऽनीशया भोग्यस्वरूपया प्रकृत्या मुह्यमानो विवेकवैधुर्यतया स्वलक्ष्यनिर्धारणेऽसमर्थःसन् शोचति स्वप्राक्तनकर्म-

ऋचोऽक्षरे परमे व्योमन् यस्मिन् देवा अधि विश्वे निषेदुः ।
यस्तन्न वेद किमृचा करिष्यति य इत् तद् विदुस्त इमे समासते ॥८
छन्दांसि यज्ञाः क्रतवो व्रतानि भूतं भव्यं यच्च वेदा वदन्ति ।
यस्मान्मायी सृजते विश्वमेतत् तस्मिंश्चान्यो मायया संनिरुद्धः ॥९

जनितदुःखादिकमनुभवतीत्यर्थः । यदात्वसौ जीवः सर्वेश्वरश्रीरामस्याहैतुकीकृपया जुष्टं श्रीहनुमदादिनित्यमुक्तादिभिरहर्निशंसंसेवितमन्यं स्वस्माद्भिन्नमीशं धारकत्वनियतृत्वशेषित्वादिनातिवैलक्ष्यण्यं "राम एव परं ब्रह्म राम एव परं तपः । राम एव परं तत्त्वं श्रीरामो ब्रह्मतारकम्" इत्यादिरूपेण श्रुतिप्रतिपादितं सर्वेशश्रीराममस्यसंकलेशितुः "यतो वै इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्तेऽभिसंविषन्ति" "जन्माद्यस्य यतः" इत्यादिश्रुतिसूत्रप्रतिपादितं महिमानमत्याश्चर्यमयमखिलजगदीशनलक्षणञ्चपश्यति परमेशितुरहैतुकीकृपया प्रत्यक्षतोऽनुभवति "यमेवैष वृणुते तेन लभ्यः" इतिश्रुतेस्तदावीतशोकऽपगत ऐहिकप्रपञ्चो भवतीतिशेषः ॥७॥

तत्त्वतः परमपुरुषाश्रयणाऽभावे वेदादिनिखिलशास्त्राध्ययनत्वादिकं नैष्फल्यं प्रतिपादयति ऋच इत्यादि । यस्मिन्नखिलाधारे विश्वेदेवाः समस्तदेवसमूहा ब्रह्मा प्रभृतिका अधिनिषेदुः समवस्थिताः सन्ति "यस्मिनोतञ्चप्रोतञ्च" "मयिसर्वमिदंप्रोतं सूत्रे मणि गणा इव" इत्यादिश्रुतिस्मृत्युक्तेः । तस्मिनखिलाधारेऽक्षरे नक्षरतीत्यरोऽविनाशी सदैकस्वरूपे परमेव्योमन् परमदिव्यधामश्रीसाकेताभिधे ऋचः सम्पूर्णभगवत्स्वरूपप्रतिपादका वेदाः समवस्थिताः सन्ति अक्षरपदं श्रीसाकेताधिनायकपरं तल्लोक बोधकतया वा नेयं तत्स्वरूपं यो मनुष्यवर्गो नविजानाति सः समवधीतेनापि ऋचा वेदसमूहेन किं करिष्यति वेदाध्ययनफलसर्वेश्वरश्रीरामस्वरूपज्ञानं तदभावे तद्व्यर्थ मेवेत्यर्थः । "एतद्वैतदक्षरं गार्गि अविदित्वाऽस्मिन् लोके जुहोति यजते तपस्तप्यते बहूनि वर्षसहस्राणि, अन्तवदेवास्य तद्भवति" इति श्रुत्युक्तेः । "स्थाणुरयं भारवाहः किलाभूदधीत्यवेदं न विजानाति योऽर्थम्" इत्याद्युक्तेश्च । इत् परन्तु येजना तत् परमब्रह्म श्रीराममक्षरपदबोध्यं "राम एव परं ब्रह्म राम एव परं तपः । राम एव परं तत्वं श्रीरामो ब्रह्मतारकम्" इतिश्रुतिप्रतिपादितं विदुस्ते चेमेविधिवदधीत्ययथोक्तदिशा श्रीरामोपासका समासते निरस्ताखिलप्रतिकूलाचरणतया सुखमासते स्वलक्ष्यभूतपरस्वरूपप्राप्त्या कृतकृत्यो भवतीत्यर्थः ॥८॥

इतः पूर्वमन्त्रे किमृचाकरिष्यतीति श्रवणाद्वैयर्थ्यशंकायामाह—छन्दांसीत्यादि ।

मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम् ।
तस्यावयवभूतैस्तु व्याप्तं सर्वमिदं जगत् ॥१०॥

छन्दांसि समस्त वेदमन्त्रस्वरूपछन्दप्रभृतयो यज्ञाः क्रतवो ज्योतिष्टोमादिविशेषाः व्रतानि नाना प्रकारका शुभसंसूचकाः सदाचारप्रभृतयस्तथान्ये च ये केचनः भूतं समतीतं भव्यंभविष्यत्कालसंभाव्यंवर्तमानकालोपलक्षितं वा वेदा वदन्ति । एतद्विश्वं प्रत्यक्षतयासमवलक्षितमखिलमपिजगन् मायी प्रकृत्यधिपतिपरमेश्वरोऽस्मात्पूर्वनिर्दिष्टान्महाभूतादितत्त्वसमूहात् सृजते स्वस्वप्राक्तनकर्मान्नुपलक्ष्य यथायथं समुत्पादयतीत्यर्थः "विकारञ्चरामोदयाब्धिस्तथात्वे दयाशून्यतां पक्षपातञ्चनैति । प्रकारे विकारस्तथा चित्र सृष्टौ च हेतुर्यतः प्राणिनां प्राच्य कर्म" इत्याचार्योक्तेः । नचात्र जीवस्यैवतथास्रष्टृत्वं संभवत्यत आह—तस्मिंश्चान्य इति । अन्योजीवः सर्वेश्वरश्रीरामाश्रितमायया संनिरुद्धः सम्यक्तया मोहितस्ततश्च तन्मायाप्रेरकत्वाभावान्न सृष्ट्यादिकार्येसमर्थः "जयद्व्यापारवर्जं प्रकरणादसन्निहितत्वाच्च" इति सूत्रकारोक्तेः "जगद्व्यापारवर्जं समानोज्योतिषा" इतितद्व्याख्यायां श्रीपुरुषोत्तमाचार्यचरणोक्तेश्च ॥९॥

पूर्वतनमन्त्रेषु 'अजा' 'माया' 'मायी' इत्यादिकं संश्रुत्य का माया? कश्चमायीति संजातशङ्काऽपकरणायाऽह मायामित्यादि । मायां सत्वरजस्तमत्रिगुणात्मिकां प्रकृतिमेव यतस्तस्या विचित्राश्चर्यजनकानन्तसृष्टिकारणत्वान्मायापदभाक्त्वं विद्यात् तथैव मायिनं मायायाः अन्तर्यामितयानैरन्तर्यप्रेरकस्तु महेश्वरं सर्वान्तर्यामिरूपेणावस्थितं परपुरुषं विद्यात् "मयाध्यक्षेण प्रकृतिः सूयते स चराचरम्" "उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः" इत्युक्तेः । न चात्रदेवतान्तरवाचकत्वेनभाव्यं महेश्वरशब्दस्य "देवात्मशक्तिं स्वगुणैर्निगूढाम्" "यद्वेदादौ स्वरः प्रोक्तो वेदान्ते च प्रतिष्ठितः । तस्य प्रकृतिलीनस्य यः परः स महेश्वरः" "दैवीह्येषा गुणमयी मम माया" "य एकोऽवर्णो विश्वमादौ स देवः" इत्याद्युक्तेः परपुरुषवाचकत्वस्यैवजागरुकत्वात्तस्य । तस्यावयवभूतैस्तस्यैवा पृथक् सिद्धविशेषणरूपतया तस्यैवांशभूतैर्ममैवांशो जीवलोके जीवभूतः सनातन इत्युक्तेस्तदंशभूतैर्जीवैरिदं सर्वं निखिलं जगत् सर्वमचेतनभूतं विश्वं व्याप्तमित्येतत् "रामो ब्रह्म परात्परं श्रुतिमतं भक्त्यैव निःश्रेयसं शेषा येन च शेषिणो रघुपते जीवा इति स्वीकृतम्" इत्याद्युक्तेः सकलेशितुः शेषिणः श्रीरामस्य शेषभूतभूतवर्गैः सर्वंव्याप्तमित्यर्थः ॥१०॥

'एकोऽहं बहुस्याम' इतिश्रुतिसमर्थितबहुरूपापन्नदेवशब्दाभिधश्रीरामंज्ञात्वैवमुक्तिं समर्थयन्नाह—यो योनिमित्यादि । यः एकः समाभ्यधिकविवर्जितः सर्वेश्वर

**यो योनिं योनिमधितिष्ठत्येको यस्मिन्निदं सञ्चविचैति सर्वम्।
तमीशानं वरदं देवमीड्यं निचाय्येमां शान्तिमत्यन्तमेति ॥११॥**

श्रीरामः "आवां तौ हि यतः कश्चिन्नाधिकोन च यत्समः। सर्वात्मानौ मतौ चावां सर्वेषां प्रेरकौ तथा" इत्याद्यागमोक्तेर्योनि जगद्योनिभूतां स्वप्रकृतिं योनिं पञ्चभूतात्मकजगद्योनिसंभूतमहदादिकमधितिष्ठति सर्गकाले जगद्योनिरूपस्वप्रकृत्यातत्तत्स्वरूपमादत्त इत्यर्थः "यतो वै इमानि भूतानि जायन्ते" इतिश्रुतेः। यस्मिन् सर्वाधार भूतेपरेशे इदंपरिदृश्यमानमनुभूयमानं वा सर्वमखिलमपि जगदुत्पत्तिकाले वियदादिस्वरूपेण व्येति विविधतामेति स्थावरजङ्गमादिरूपेणानन्तप्रकारकोभवतीत्येतत्। उपसंहारकाले च समेति स्वस्वरूपत्वेनैक्यं समाप्नोतीत्यर्थः। "सर्वभूतानि कौन्तेय? प्रकृतिं यान्तिमामिकाम्। कल्पक्षये पुनस्तानि कल्पादौ विसृजाम्यहम्" "प्रकृतिं स्वामवष्टभ्य विसृजामि पुनः पुनः। भूतग्राममिमं कृत्स्नमवशं प्रकृतेर्वशात्" "मनसैव जगत्सृष्टिं संहारं च करोति यः" इत्यादिस्मृत्युक्तेः। तम् प्रकृतंसमाश्रिताभिष्टप्रदायिनमीशानं सर्वनियन्तारं वरदं स्वशरणापन्नजनेभ्योऽभीष्टप्रदायकमीड्यं संस्तुतियोग्यं सर्वेश्वर श्रीरामं "यस्यामलं नृपसदस्सुयशोऽधुनापि गायन्त्यघघ्नमृषयोदिगिभेन्द्रपट्टम्। तं नाकपालवसुपालकिरीटजुष्टपादाम्बुजं रघुपतिं शरणं प्रपद्ये" इत्याचार्यशिरोमणिभगवद्व्यासोक्तेः। प्रकृतश्लोकव्याख्यायां श्रीशुकार्यमतदीपिकायामाचार्यप्रवरश्रीगङ्गाधराचार्यचरणास्तु "मर्यादापुरुषोत्तमस्यलीलाप्रयोजनमतिसमासेनप्रदर्शयन् स्वशरण्यत्वाच्छरणं गच्छति–यस्यामलमिति यस्य श्रीरामचन्द्रस्यामलमघघ्नं पापनाशकं पादाम्बुजं तत्सम्बधिरेणुं नृपाणां युधिष्ठिरप्रभृतीनां सदस्सु ऋषयो मार्कण्डेयप्रभृतयो यशोऽधुनापिगायन्ति यद्यशोदिगिभेन्द्राणां पट्टवदाभरणस्वरूपेण तत्पर्यन्तं व्याप्तं नाकपाला देवा वसुपालास्तेषांकिरीटैर्जुष्टं पादाम्बुजं यस्य तं रघुपतिमखिलजीवशरण्यं शरणं प्रपद्ये। यद् वा नास्त्यकं यस्मिन् स नाकः सत्यलोकस्तदधिष्ठातृदेवो ब्रह्मा वसुशब्दश्च धनभूत पशूपलक्षकस्ततश्च पशुपतिः शंकरस्तयोरिति योज्यम्। रघुपतेरिति पाठे तस्य रघुपतेर्नाक पालादिभिर्जुष्टं पादाम्बुजमिति संयोज्यम्। प्रकृतश्लोकीयतत्त्वन्तुभगवच्छ्रीबोधायनपुरुषोत्तमाचार्यचरणप्रसादित—

(श्रीरामतत्त्वम्)

"स्वां दत्त्वा भरतं कृपापरवशो योऽन्वग्रहीत्पादुकां
गत्वाऽरण्यपथादवाग्दिशमथो दूरे पथो व्युत्थितान्!
लोकत्राणकृते रणे नरभुजोऽरं न्यग्रहीदग्रही
साकेते स विराजते जनकाप्राणः शरण्यः सताम् ॥१॥

भक्तो दुष्कृतमेव मे न कुरुते यत्तत्कृतं तत्समं
वात्सल्यादिदमाह सागरसुतोपालम्भमुन्मूलयन् ।
योऽसौ दिव्यगुणाकरो मुदिररुग् हेयप्रहीणः प्रभुः
सेव्यः सद्भिरभीतिदो दशशिरः संहारकृत्तापरः ॥२॥
पश्येदं बलवल्लसन्मम धनुर्दुःक्षत्रगोत्रान्तकृत्
सार्धोग्रंकिल जामदग्न्यमजयद् योऽनुग्रहैकाशयः ।
विश्वामित्रमखावनप्रयतितो बालोऽपि कल्पानल-
प्रख्योऽहन्निह ताटकां स भगवान् रामः प्रणम्यो न कैः ? ॥३॥
दत्तानुज्ञ उदन्तमेत्य निखिलं मात्रा सुमित्राह्वया
कैकेय्या सुरमायया हृतधियाऽऽदिष्टः सतामाश्रयः ।
कौशल्यां रुदतीं विहाय विपिनं योगात्स्वकृत्यं विद-
न्निष्टानिष्टसमो मनोनिविशते नो कस्यपुण्यात्मनः ? ॥४॥
साम्राज्यं महदप्यखिन्नमनसा भ्रातर्य्यधीनं कृतं
विख्या शूर्पणखाकृता विपथगा बद्धौऽम्बुधिर्नीलवाः ।
राज्यं प्राज्यमदाद्विभीषणकृते हत्वा दशास्यं द्रुहं
रामः सोऽयमलौकिकीकृतिपटुर्भक्तप्रियः सेव्यताम् ॥५॥
विश्वेषामवनो जगत्कृतिपटुः कल्पान्तकालाश्रयी
नैकावासनिवासकृच्छिद्रितजनानर्थच्छिदे देहभाक् ।
सूक्ष्मस्थूलजडाजडात्मकतनुस्तत्रावतीर्णोऽपि सन्
ज्ञेयः सर्वविलक्षणोऽद्भुतगती रामः कथं तत्त्वतः ? ॥६॥
भक्तेभ्योऽन्यजनैरनाप्यमतुलं दिव्यं दधद्विग्रहं
सर्गासर्गतनुग्रहादिविधिषु ज्ञेयः स्वकैर्ज्ञापितैः ।
सन्तुष्टः कपिसेवयापि तुलसीमालोपशोभीविभू
रामो धर्मतनुस्सहस्ररसनैर्वर्ण्यो न शेषैरपि ॥७॥
कालो रावणमातुलस्य सरुषं सृष्टेन वार्धेरपा
मत्युत्तापकरः शरेण शरणापन्ने प्रसादातुरः ।
भक्तेभ्यस्तदपेक्षयैव कृपया स्वर्गापवर्गप्रपदो
रामः सैष जयत्युदारसुगुणग्रामो विरामोऽसताम् ॥८॥
उल्लालोर्जितवारिधौ कृतपथः सैन्यैः कपीनां पुरीं
लङ्कामेत्यविनाश्य राक्षसकुलं तीक्ष्णेषुवृष्ट्याऽधमम् ।

ऋद्धं राज्यमदाद्विभीषणकृते चित्रं चरित्रं श्रितो
रामः श्रीपुरुषोत्तमोविजयते माङ्गल्यमूर्तिः प्रभुः ॥९॥
छित्वैकेषुनियोगतो द्रुमवरान् सप्ताञ्जसा वालिनं
हत्वाऽतूतुषदाशु शङ्कितहृदंभीतं कपीनां पतिम् ।
सुग्रीवं सहृदं प्रपन्नमसतां नाशेऽनिशं सोद्यमः
स्वोद्धाराय सतां स एव भगवान् सेव्यः परेभ्यः परः ॥१०॥
त्राता सुन्दरदीर्घदृक् क्षितिसुता हत्वाऽमितान् राक्षसा
नार्ताऽशोकवनं गता स्मृतिपराऽनन्याश्रयाऽङ्गीकृता ।
तद्वन्मां शरणागतं रघुपते ! दीनावनैकव्रत ?
स्वीकुर्वाशु विनाथनाथ ? दययोपेक्षस्व मा मा प्रभो ? ॥११॥
प्राणा देहिषु शेमुषी शुभतमाऽथाऽसत्तमाऽधि त्वयि
त्वञ्चैवाऽसि विभोऽस्ति यच्छुचितमं गव्यं च पश्चामृतम् ।
अध्यास्से च विभूतिषूत्तमगुणाधारोऽपि नित्यादिषु
शेषास्तेऽब्धिभवांश्च रत्ननिचया दासोऽहमीशो भवान् ॥१२॥
बाणैश्चूर्णयिताऽस्त्रपान् दृढतनूंल्लौहादपि प्रोद्धता
निक्षोर्यष्टिरिवाऽनिशं नतजनेष्वाद्यन्तमाधुर्यवान् ।
रोलम्बाञ्चितशीतलाच्छतुलसीहाराभिराम ? प्रभो ?
राम ? त्वत्पदपद्ममात्रहृदयं दासं दयस्व स्वकम् ॥१३॥
क्षीराब्धौ निजसेवकेन कपिना क्षारीकृतां प्राक्पुरीं
लङ्कामेत्य समित्यभद्रमधियं हन्ताऽऽशराणां शरैः ।
श्रीरामो विजयी विभीषणमधाद् दास्ये पदे निर्भये
भक्त्या सन्निहितस्य तस्य न भयं क्रूरात्कृतान्तादपि ॥१४॥
सोढ्वा दुःखानि नानाऽतिविषमविषयक्ष्वेडसङ्गात्सुखेच्छु
रात्रौ भुक्त्वा शयानोऽप्यवहितहृदयो गात्रपोषेऽमतिर्यः ।
धिक्धिक् कुक्षिं भरिं तं सकलगुणनिधिं तौलसेयीसनाथं
भक्त्या संसेव्य लभ्यं परतरममृतं मौर्ख्यतो हा जहाति ॥१५॥
शास्त्राऽऽसेवारतास्तेऽतुलविमलधियोलब्धतत्त्वावबोधाः
श्रेयः प्रत्यर्थिभूतं कुमति कुलमतं श्रोतुमर्हा न मन्तुम् ।
एको देवः सरामः शपथ इहमयाऽत्युग्रशस्त्रप्रहारै
श्छिन्नं न स्याच्छिरोमे मरणमपि न मे द्वापरो नात्र कोऽपि ॥१६॥

यो देवानां प्रभवश्चोद्भवश्च विश्वाधिपो रुद्रो महर्षिः ।
हिरण्यगर्भं पश्यत जायमानं सनोबुद्ध्या शुभया संयुनक्तु ॥१२॥

कोदण्डेनाऽतुलेनोल्लसितमृदुशयः सेतुबन्धेन सिन्धौ
गत्वा लङ्कां समेषां शुभकृतिमतिमानादरी घोरयुद्धे ।
पत्युर्हन्ताऽसपाणां परतरमहिमा राजतेदिव्यमूर्तिः
साकेते नेक्षितस्तं भजति करुणया तेन गर्भादभाग्यः ॥१७॥
भक्तिर्नोचेन्न साऽस्तु द्विषमपि सभिया नो यथा रावणादिः
सीतेशस्तावतापि प्रसृमरदयया त्वां विदध्यात्स्वकीयम् ।
वाचा तन्वा हृदा वा यदि नहि भजसेऽशक्तितोऽज्ञानतो वा
दृष्ट्वास्या दिव्यमूर्तिं परमसुखमयः प्राप्त एवाऽसि रामम् ॥१८॥
आनीयानीयशैलाञ्जलनिधिसलिलेन्यस्यतो वानरेन्द्रान्
सेतोर्हेतोः सुभक्त्या सपदि रघुपतेः प्रीतिपात्राणि दृष्ट्वा ।
सेवावेशाज्जलाद्रैस्तनुतनुरसकावङ्गकैर्धूलिमस्यन्
जन्तुर्जातः कृतार्थो जभतमुहुरमुंराममेकं दयालुम् ॥१९॥
विश्वामित्रस्य यज्ञान्नरवरवपुषा वारयन् राक्षसान् यः
स्नानं सम्पादयन् प्रागवमृथमनघंख्यातकीर्तिर्जगत्याम् ।
तेषां तेषां खलानां निखिलजनिमतां पीडनातत्पराणां
नाशायाऽऽकृष्ट चापोऽद्भुतकृतिनिपुणःसेव्यतां सोऽखिलेशः ॥२०।”

इत्यादिश्रीरामतत्त्वानुसन्धायकश्रीरामतत्त्वाद्यनेकदिव्यप्रबन्धतोऽनुसन्धेयो विशेषार्थिभिः” इत्यादिकं संगिरन्ति । तदेव सर्वतोभावेननिःश्रेयसायसर्वजनसेवनीयं देवं देवशब्दवाच्यंपरमेश्वरं श्रीरामं निचाय्यदर्शनसमानाकारस्वरूपज्ञानेन स्वविषयीकृत्योपासकोऽत्यन्तसर्वतोभावेनरागद्वेषादिरहितत्वे स्थायित्वमापन्नामिमां श्रुतिस्मृत्यादिभिः परिपुष्टां मुक्तिपदाभिलप्यां शान्ति परमश्रेयोरूपामेति समवाप्नोतीत्यर्थः । श्रीरामशरणागतिं विहाय नैरन्तर्यशान्तिलाभाभावो जीवानामितितात्पर्यार्थः ॥११॥

“नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन । यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनुंस्वाम्” इति श्रुत्युक्तेर्भगवज्ज्ञानोपायपरमपुरुषानुग्रह एवेतितल्लाभार्थं प्रार्थयते यो देवानामित्यादि । यो देवानामिन्द्रवरुणरुद्रप्रभृतीनामुद्भवः उद्भवत्यस्मादितिव्युत्पत्तेः प्रभवश्च प्रकर्षेण भवतीति प्रकर्षरूपेण देवाधिपति

यो देवानामधिपो यस्मिल्लोका अधिश्रिताः ।
य ईशे अस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेय ॥१३॥
सूक्ष्मातिसूक्ष्मं कलिलस्य मध्ये विश्वस्यस्रष्टारमनेकरूपम् ।
विश्वस्यैकं परिवेष्टितारं ज्ञात्वा शिवं शान्तिमत्यन्तमेति ॥१४॥

त्वादिकमस्य प्रभवनमिति यावत् "यान्येतानि देवत्रा क्षत्राणि इन्द्रो वरुणः सोमो रुद्रः पर्जन्यो यमो मृत्युरीशानः" इति श्रुतेः "अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च" इतिस्मृतेश्च स्वकर्मफलप्रदायित्वरूपप्रभुत्वस्य प्रजापतिपशुपतित्वादिरूपस्थानसंप्रापकत्वस्वरूपोद्भवनस्य च सर्वेश्वरपरमपुरुषाधीनत्वादिति भाव्यम् । विश्वाधिपः सर्वस्यापि जगतस्तदेकदेशैकदेशरूपतयाविश्वाधिपत्वम् "विष्टभ्याहमिदं कृत्स्नमेकांशेन-स्थितो जगत्" इति गीतोक्तेः । रुद्रः संसाररुजां संद्रावकत्वाच्चरुद्रपदाभीधेयः पर पुरुषो महर्षिरतिशयसार्वज्ञत्वादिगुणविशिष्टतया महर्षिपदभाक्निखिलेश्वरोऽस्ति येन प्रथमं जायमानं समुद्भूतं हिरण्यगर्भं पश्यत "यो ब्रह्माणं विदधाति पूर्वं योवै वेदांश्च प्रहिणोति तस्मै" "सृष्ट्यादौ च सिसृक्षुः श्रीरामोविधिं विधाय हि। सृष्टये प्रेषयामास वेदं ज्ञानमहा-निधिम्" इत्यादिरूपेण श्रुतिस्मृतिप्रतिपादितदिशा मद्विसृष्टोऽयं स्वकर्मणि कृतमनोरथः स्यादिति सानुग्रहं समुदैक्षत । सः परमेश्वरो न शुभया बुद्ध्या दिव्यमाङ्गल्यभाव-नया साबुद्ध्येत्यर्थः संयुनक्तु संयोजतु स्वस्याहेतुक्या करुणयादृष्ट्या मां समववीक्ष-तामितिभावः ॥१२॥

प्रार्थनाप्रकारमेव प्रपञ्चयति योदेवानामधिप इति । यो देवानामधिपोऽखिल-चिदचित्प्रपञ्चजातस्याधिपतिर्यस्मिन् सकलाधारभूतेपरब्रह्मणि लोका अधिश्रिताः सर्व-तोभावेन जनाः समाश्रिताः सन्ति "सर्वस्याधारभूतौ च त्वावामेवहि मारुते ?। स्वेमहि म्नि स्थितावावामन्याधारो न चावयोः" इत्यागमोक्तेः । यश्चास्य सर्वव्यवहारभूतद्वि-पदश्चतुष्पदश्च समस्त जीवसमूदायस्येशे शासनकर्ताऽस्ति सम्पूर्णचिदचिद्वर्गनियन्ते-त्यर्थः । कस्मै देवायाऽऽनन्दस्वरूपाय सर्वशेषिणे वयं हविषा पुरोडाशादिना श्रद्धा भक्तिपूर्वकप्रस्तुतेनाऽन्येन वा पूजोपकरणद्रव्यदिव्यस्तुतिपाठादिना विधेय पूजां सम्पा-दयामः । "यज्ञो वै विष्णुः" "चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पञ्चभिरेव च । हूयते च पुन र्द्वाभ्यां स नो विष्णुः प्रसीदतु"इति श्रुतिस्मृतितोयज्ञोविष्णुः सर्वव्यापकः श्रीराम इत्य-वगम्यते ततश्च तदाराधनात्मकं पुरोडाशादिसमर्पणात्मकं तदुपयोगात्मकमन्यमपि सर्वं प्रेमोत्साहपूर्वकं श्रीरामसायुज्यसम्प्राप्तये परेशकैङ्कर्यबुद्ध्यासमाराधयाम इत्यर्थः ॥१३॥

स एव काले भुवनस्य गोप्ता विश्वाधिपः सर्वभूतेषु गूढः ।
यस्मिन् युक्ता ब्रह्मर्षयो देवताश्च तमेवं ज्ञात्वा मृत्युपाशांश्छिनत्ति ॥१५

श्रुतिस्मृत्यादिविहितभगवत्कैंकर्यबुद्ध्यासमाराधितकर्मफलमाह—सूक्ष्मातिसूक्ष्ममित्यादि । सूक्ष्मरूपेण प्रसिद्धपरमाणोरप्यन्तप्रवेशयोग्यमत्यन्तसूक्ष्ममणोरणीयानिति श्रुतेः कलिकस्य मध्ये स्थितमन्तर्यामितयाप्रतिजीवहृदयगुहाद्यनेकस्थानेसमवस्थितमित्येतत । विश्वस्याखिवलब्रह्माण्डस्यप्रजापतिहिरण्यगर्भाद्यनेकरूपेणावस्थायतत्तदानुकूल्यप्रातिकूल्येनस्रष्टारं प्राक्तनकर्मानुगुण्येन सर्वसर्जकमनेकरूपमनन्तस्वरूपमनन्तरूपधारकमित्यर्थः । विश्वस्य परिवेष्टितारमन्तर्यामित्वेन सर्वतः सर्वव्याप्तमोतञ्च प्रोतञ्च, सर्वतः स्पृत्वा, विश्वतः स्पृत्वेत्यादिश्रुतेः । एतादृशापूर्वस्वरूपमेकमद्वितीयं स्वसमाभ्यधिकविवर्जितमित्येतत् । शिवं सर्वकल्याणस्वरूपं परमात्मानं ज्ञात्वा याथार्थ्येनसमवधार्योपासकोजीवसमूहोऽत्यन्तं शान्तिमेति पुनरावृत्तिविवर्जितां शाश्वतिकीं मुक्तिसमवगच्छति "मामुपेत्य पुनर्जन्मदुःखालयमशाश्वतम् । नाप्नुवन्ति महात्मानः संसिद्धिं परमां गताः ॥ आब्रह्म भुवनाल्लोकाः पुनरावर्तिनोऽर्जन ! । मामुपेत्य तु कौन्तेय ! पुनर्जन्म न विद्यते" इतिगीतोक्तेः "सत्यसन्धः प्रतिश्रुत्य प्रपन्नायाभयं स्वयम् । निवर्तयेद्भयं नैनं श्रीरामः श्रितवत्सलः" इत्याद्याचार्योक्तेश्च ॥१४॥

पूर्वमन्त्रोदितमेवसमर्थयति स एव काल इत्यादि । स एव जगद्योनिरखिलविश्वस्याभिन्ननिमित्तोपादानकारणभूतसर्वेश्वरश्रीरामः काले सर्वजीवकर्मपरिपाकसमये भुवनस्य गोप्ता समस्तब्रह्माण्डस्य संरक्षकोविश्वाधिपोऽखिलजगतोऽधिपतिः सर्वभूतेषु गूढः सर्वप्राणिसमुदायेषुनिगूढश्चास्ति सर्वशेषित्वात्सर्वान्तर्यामितया सर्वंसमवाप्य संतिष्ठत इत्यर्थः । यस्मिनेतादृशमहिम्नि सर्वलोकशरण्ये श्रीरामे ब्रह्मर्षयोऽखिलवेदतत्त्वज्ञमहर्षिगणाः देवताश्च ब्रह्मादिदेवगणा अपि "यस्यामलं नृपसदस्सु यशोऽधुनाऽपि गायन्त्यघघ्नमृषयोदिगिभेन्द्रपट्टम् । तं नाकपालवसुपालकिरीटजुष्टपादाम्बुजं रघुपतिं शरणं प्रपद्ये ॥" "ध्येयं सदापरिभवघ्नमभीष्टदोऽहं तीर्थास्पदं शिवविरिञ्चिनुतंशरण्यम् । भृत्यार्तिहं प्रणतपालभवाब्धिपोतं वन्दे महापुरुष ! ते चरणारविन्दम् ॥" इत्याद्युक्त्या स्वश्रेयसे युक्ताः सर्वदा ध्यानाभ्यासादिना संलग्नाः सन्ति शेषशेषिभावसम्बन्धत्वेनसर्वेशाराधने सर्वदा प्रशक्ता भवन्ति तस्यैव सर्वमोचकत्वादित्यर्थः । यतस्तमुक्तस्वरूपं परमात्मानमेवमुक्तप्रकारेण ज्ञात्वा दर्शनसमानाकारज्ञानविषयीकुर्वन् मृत्युपायान् जायस्वम्रियस्वेति सूचितमरणधर्मत्वादिबन्धनान्छिनत्ति संसारसंसरणभूतान् पाशान् संछिद्यसंसारागमनात्सर्वतोभावेनमुक्तो भवतीत्यर्थः ॥१५॥

घृतात्परं मण्डमिवातिसूक्ष्मं ज्ञात्वा शिवं सर्वभूतेषु गूढम् ।
विश्वस्यैकं परिवेष्टितारं ज्ञात्वा देवं मुच्यते सर्वपाशैः ॥१६॥
एष देवो विश्वकर्मा महात्मा सदा जनानां हृदये संनिविष्टः ।
हृदा मनीषा मनसाभिक्लृप्तो य एतद् विदुरमृतास्ते भवन्ति ॥१७॥
यदातमस्तन्न दिवा न रात्रिर्न सन्न चासच्छिव एव केवलः ।
तदक्षरं तत् सवितुर्वरेण्यं प्रज्ञा च तस्मात् प्रसृता पुराणी ॥१८॥

अनवद्यत्वरूपेणातिसूक्ष्मतयासर्वं समव्याप्यस्थितं परस्वरूपं ज्ञात्वैव मुक्तो भवतीत्याह घृतात्परमित्यादि । शिवंसर्वकल्याणस्वरूपमेकं देवमद्वितीयत्वेन वर्तमानं सर्वेशं घृतात्परमतिसूक्ष्मतयासारांशभूतसर्वक्षीरव्यापीमण्डमिवसर्वसूक्ष्मासूक्ष्मजडचेतनसमव्याप्य-स्थितमतिसूक्ष्मं सर्वभूतेषु समस्तचिदचित्पदार्थेषुगूढं सर्वान्तर्यामित्वेनविद्यमानं ज्ञात्वा विश्वस्यपरिवेष्टितारमखिलं जगत्सर्वतो भावेन समव्याप्यसन्नियमनकर्तारं तत्र तत्र तत्तद्रूपेणावस्थायतत्तच्छुभाशुभकर्मसु स्वप्राक्तनकर्मानुगुण्येनसंप्रवर्तकमित्येतत् ॥ "विकारश्चरामो दपाङ्घिस्तथात्वे दयाशून्यतां पक्षपातश्चनैति । प्रकारे विकार स्तथा चित्रसृष्टौ च हेतुर्यतः प्राणिनां प्राच्यकर्म" इत्याचार्योक्तेः । ज्ञात्वा दर्शनसमानाकारज्ञानविषयं कृत्वेत्यर्थः । जीवः सर्वपाशैर्मुच्यते शापवद्बन्धनसाधनीभूतसर्वकर्मतोविमुच्यत इत्यर्थः ॥१६॥

एषदेव इत्यादि । विश्वकर्मा क्रियते इति कर्म विश्वंकार्यं यस्येत्यर्थः संसारकर्तेत्येतत् । महात्मादेवः परमपुरुषः सदा जनानां हृदये हृदयप्रदेशे सन्निविष्टः सम्यक्तया स्थितोऽस्ति अतो हृदा मनीषा बुद्ध्या मनसा च अभिक्लृप्तः सम्यग्ध्यानविषयीकृतः सन् प्रत्यक्षोभवति ये साधका एतन्निगूढतत्वंविदुस्तेऽमृताः अमृतस्वरूपा मरणधर्मव्यापारवर्जिता मुक्ता इत्यर्थः भवन्ति ॥१७॥

"शरण्यौ वेदनीयौ च भजनीयौ हि मुक्तये । वेदवेद्यो जगद्योनिर्मन्निभोराघवोमतः" इत्यादिरूपेणवशिष्ठसंहितायां जगज्जननी सर्वेश्वरी श्रीसीतायाः प्रतिपादितदिशा वेदवरेण्यशब्दोपलक्षितगायत्रीमन्त्रप्रतिपाद्यत्वमपि पूर्वप्रक्रान्तसर्वेशस्यैवेति प्रतिपादयति—यदातम इत्यादि । यदातमो यस्मिन् समयेसदसत्वेनमूर्तामूर्तत्वेप्रपञ्चितं रात्रिन्दिवविभागराहित्यतया तमोमात्रांस्थितं "सूक्ष्माचिच्चिद्द्वयेनावां विशिष्टौ प्रलये किल । सृष्टावावां विशिष्टौ तु स्थूलाचिच्चिद्द्वयेन हि" इत्यागमोक्तेऽत्र तमः शब्दप्राग्वर्णितमायापदबोधकोऽवसेयः प्रलयकालेऽपिस्थायित्वात् तस्याः तत् तदातस्मिन् काले

नैनमूर्ध्वं न तिर्यञ्चं न मध्ये परिजग्रभत् ।
न तस्य प्रतिमा अस्ति यस्य नाम महद्यशः ॥१९॥

प्रणष्टे स्थावरजङ्गमे ब्रह्मादिषु परब्रह्मणि श्रीरामे प्रलीनेष्वित्यर्थः । न दिवा न रात्रि र्नसन् नचासनित्यादिपदप्रयुक्तव्यवहारो भवति परञ्च तदा केवलः शिव एव सर्वदा संकुचित ज्ञानमहिमा कल्याणगुणगणगुम्फितः सर्वशरण्यः सर्वेश्वरो जगद्योनिश्री राम एवास्ते तच्चाक्षरं क्षरणगुणधर्मरहितं सदैकरूपंस्वभावञ्चेत्येतत् । तदेव च सवितुः सर्वान्तर्यामित्वेनसवितृमण्डलमध्यवर्त्तित्वात्सूर्यब्रह्मादिसर्वदेवानां वरेण्यं वरणीयं समुपासनीयं भजनीयञ्चेत्यर्थः । तस्मात्पूर्वप्रपञ्चितपरेशादेवसंकुचितज्ञानवतां प्रजानां सृष्टिकाले पुराणीं प्रज्ञा नित्यं ज्ञानमनादीत्येतत् धर्मभूतज्ञानस्य नित्यत्वावगमात् "न विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यते" "अविनाशी वा अरे अयमात्मा अनुच्छित्ति-धर्मा" इत्यादिश्रुत्युक्तेः । गायत्रीमन्त्रपठित 'धियोयोनः प्रचोदयात्' इत्यंशप्रतिपा-दनपरत्वेन नेयमत्रत्य प्रज्ञा च तस्मादितिपदम् यतः श्रीरामस्यैव सर्वप्रेरकत्वात् । प्रसृता पारम्पर्येणाऽवच्छिन्नाचार्यगत्या प्रसरणमवाप्तेत्यर्थः "यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै" "सृष्ट्यादौ च सिसृक्षुः श्रीरामोविधिं विधाय हि। सृष्टये प्रेषयामास वेदं ज्ञानमहानिधिम्" इति श्रुतिस्मृत्युक्तेः ॥१८॥

ब्रह्मणोगुणतः स्वरूपतश्चापरिच्छेद्यत्वं प्रतिपादयति—नैनमूर्ध्वमित्यादि । एनं सर्व-व्यापकपरमात्मानं नोर्ध्वमूर्ध्वत्वेनस्थाणवादितयावर्तमानं न तिर्यञ्चं तिर्यक्त्वेन पश्वादि-रूपत्वेनवर्तमानं न मध्ये मनुष्यादिस्वरूपेणोभयविलक्षणस्वरूपेणवर्तमानमपि कश्चिज्जनः परिजग्रभत् याथातथ्येन न समन्वग्रहीत् सर्वव्यापकत्वेऽपि ब्रह्मस्वरूपं सम्यग्रूपेण ज्ञातु मक्षम इत्यर्थः । परेशकृपाकटाक्षराहित्यात्तदनुग्रहेतु तत्स्वरूपं तत्त्वतोऽनुभविष्यत्येव "नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुधाश्रुतेन । यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनुंस्वाम्" इतिश्रुत्युक्तेः । ब्रह्मणोविभुत्वादूर्ध्वप्रदेशब्रह्मेन्द्रलोकादिषु विद्यमानात्तत्तदधिष्ठातृदेवविशेषा अपि तत्त्वतो ज्ञातुमक्षमा इति वा योज्यं तेषां जीव-कोटिनिविष्टत्वेनाल्पज्ञतया प्रसिद्धेः । यस्यमहद्यशः "यस्यामलं नृपसदस्सुयशोऽधु-नापि गायन्त्यघघ्नमृषयोदिगिभेन्द्रपट्टम् । तंनाकपालवसुपालकिरीटजुष्टं पादाम्बुजं रघुपतेः शरणं प्रपद्ये" इत्यादिरूपेणपरमाचार्यश्रीव्यासादिभिः समुपवर्णितनामाति प्रसिद्धमस्तित्रिजगत्यां तस्य प्रतिमा तादृशपुरुषस्योपमानास्ति सर्वातिशायित्वात्तस्य "नेदं यशोरघुपतेः सुरयाञ्चयात्तलीलातनोरधिकसाम्यविमुक्तधाम्नः । रक्षोवधो जलधिबन्ध-नमस्त्रपूगैः किं तस्य शत्रुहनने कपयः सहायाः" इतिबादरायणोक्तेः ॥१९॥

न संदृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्चनैनम् ।
हृदा हृदिस्थं मनसा य यनमेवं विदुरमृतास्ते भवन्ति ॥२०॥
अजात इत्येवं कश्चिद्भीरुः प्रपद्यते ।
रुद्र यत्ते दक्षिणं मुखं तेन मां पाहि नित्यम् ॥२१॥

अधुनां परमपुरुषावबोधायसाधनमुच्यते—नसंदृश इत्यादि । अस्य परमपुरुषस्य रूपं सर्वव्यापकीभूतमन्तर्यामिस्वरूपमप्राकृतदिव्यविग्रह इत्यर्थः । संदृशे दृष्टिपथे न तिष्ठति दर्शनगोचरतांनायातीत्यर्थः । ततोहेतोः कश्चनैनं चक्षुषा नपश्यति चक्षुषः प्राकृतत्वेन कश्चिदपि देवमनुष्यगन्धर्वमनुष्यो वा तादृशेन परेशंद्रष्टुं नाक्षमस्तस्थान्तर्यामिस्वरूपस्य सर्वव्यापकत्वाद्विग्रहस्य च प्राकृतत्वात् । प्राकृतमिन्द्रियजातमप्राकृतग्रहणाऽसमर्थमित्यर्थः । चक्षुषादिदर्शनसाधननिषेधात् किं परमात्मदर्शनसाधनमिति शङ्कायामाह—हृदेति हृत्पद्मन्त्र हृदयस्थाया बुद्धैर्लक्षकं तथा च भक्तिरूपापन्नाया हृदयस्थयाबुद्ध्या तथा मनसा निर्मलस्वान्तेन स्वनियन्त्रकभक्तिरूपापन्नबुद्धिकृतसंस्कारेण चेतसेत्यर्थः "मनसा तु विशुद्धेन" "मनसैवेदमाप्तव्यम्" इत्यादिश्रुतेः । ये समुपासकाः एनं स्वोपास्यभूतं सर्वेशं श्रीरामं हृदिस्थमन्तर्यामितया स्वहृदये समवस्थितमित्येवंरूपेण विदुः साक्षादनुभवन्ति ते तादृशाः समुपासका अमृता भवन्ति पुनरावृत्ति विवर्जितश्रीरामसायुज्यमाप्नुवन्तीत्यर्थः ॥२०॥

पूर्वोक्तरीत्यापरब्रह्मस्वरूपं तत्प्राप्त्युपायञ्चोपवर्ण्यपरस्वरूपध्यानस्यमोक्षोपायत्वावगमात्तद्ध्यानं कुर्वनभीष्टमर्थयते—अजात इत्येवमित्यादि । रुद्र ? सर्वसंसाररुग्द्रावकत्वाद्रुद्ररूप हे सर्वेश श्रीराम ? "ऋतधामावसुः पूर्वं वसूतां च प्रजापतिः । त्रयाणामपिलोकानामादिकर्तास्वयं प्रभुः । रुद्राणामष्टो रुद्रः साध्यानामपि पञ्चमः । अश्विनौ चापि कर्णौते सूर्याचन्द्रमसौदृशौ । अन्ते चादौ च मध्ये च दृश्यसे च परंतपः । इत्यादि रूपेणमहर्षि श्रीवाल्मीकिनिर्वचनात्सर्वसर्गस्थित्यन्तकृत्वं श्रीरामस्यैवेति रुद्रत्वं तस्य । त्वमजातः इतरदेवजीवादिवज्जननलक्षणसंहारादिहीन इत्येवं मत्वा कश्चिन्मादृशः संसारानलसंतप्तस्वकर्मपारिपाकरूपजन्ममरणक्लेशभीरुरहं ते यद् दक्षिणं कल्याण प्रदसर्वाभयस्वरूपं मुखम् "विकचपद्मदलायतवीक्षणं विधिभवादिमनोहरसुस्मितम् । जनकजादृगपाङ्गसमीक्षितं प्रणतसत्समनुग्रहकारिणम्" मुनिमनः सुमधुव्रतचुम्बितस्फुटलसन्मकरन्दपदाम्बुजम् । बलवदद्भुतदिव्यधनुः शरामहितजानुविलम्बिमहाभुजम् ॥ परार्ध्यहाराङ्गदचारुनूपुरं सुपद्मकिञ्जल्कपिशङ्गवाससम् । लसद्घनश्यामतनुं गुणाकरं

मा नस्तोके तनये मान आयुषि मानो गोषु मानो अश्वेषु रीरिषः।
वीरान्मानो रुद्र भामितो वधीर्हविष्मन्तः सदमित्त्वाहवामहे ॥२२॥

॥ इति श्वेताश्वतरोपनिषदि चतुर्थोऽध्यायः ॥

कृपार्णवं सद्धृदयाम्बुजासनम् ॥ प्रसन्नलावण्यसुभ्रून्मुखाम्बुजं जगच्छरण्यं शरणं नरोत्तमम्'' शरणं प्रपद्यते उक्तविशेषणविशिष्टं त्वां प्रपद्ये समाश्रयामीत्यर्थः। छान्दसत्वात्पुरुषव्यत्ययः। तेन च मत्कृतप्रपदनेन भवदभिध्यानेनेति यावत् मां नित्यं पाहि सकृदेवप्रपन्नाय तवास्मीति च याचते। अभयं सर्वभूतेभ्यो ददाम्येतद्व्रतं मम'' ''सत्य सन्धः प्रतिश्रुत्य प्रपन्नायाभयं स्वयम्। निवर्तयेद्भये नैनं श्रीरामः श्रितवत्सलः'' इत्यादिकं स्वविरुदंस्मरन्नपास्तसंसारं कुरु सर्वाभयप्रदं श्रीसाकेतं प्रदाय मां स्वकिंकरं कुर्विति सानुनयप्रार्थना ॥२१॥

परपुरुषप्रपत्तिनिष्पत्तये स्वपरिजनान्नपेक्षमाणस्य जनस्य काम्यकर्मत्वेन समाराध्योऽपि सैवेति बोधयति मानस्तोके इत्यादि। रुद्र ! हे संसाररुग्द्रावक ! सर्वसंहारकेत्यर्थो वा ''कालः कलयतामहमितिस्मृत्युक्तेः। त्वदुपासका वयं हविष्मन्तस्त्वत्पूजोपकरभूतगन्धाक्षतपुरोडाशादिभिः संयुक्ताः सन्तः सदमित् सर्वदैव त्वा त्वां स्वरक्षायै हवामहे समाराधयामः संप्रार्थयामः इत्येतत्। अतस्त्वमस्मद्विरुद्धाचरणेन जीवलक्ष्यभूतत्वत्प्रपदनरूपपरमधर्मत्यागजनितावेनेतियावत् भामितो मदाज्ञापरिपन्थीति कुपितस्सन् मानस्तोके पुत्रे तनये पौत्रे मानः आयुषि मानः गोषु मानः अश्वेषु वा रीरिषः न्यूनतां मा सम्पादय ऐहिकसाधनतयापत्यपुत्रायुगोऽश्वप्रभृतीन् माहिंसीरित्यर्थः रिषधातोर्हिंसार्थकत्वात्। तथैव नो वीरान् सुवीर्यसम्पन्नान् जनान् मोक्षसाधनीभूतान् ज्ञानवैराग्यादीन् वा मा वधीः हिंसां मा विधेहीत्यर्थः। साधनवैकल्येसाधनानुपपत्ते तेषां माहिंसीरिति प्रार्थना ॥२२॥

इति श्वेताश्वतरोपनिषदो भगवच्छ्रीरामानन्दाचार्यप्रणीतानन्दभाष्ये चतुर्थोऽध्यायः

卐 पञ्चमोऽध्यायः 卐

द्वे अक्षरे ब्रह्मपरे त्वनन्ते विद्याविद्ये विहिते यत्र गूढे ।
क्षरं त्वविद्या ह्यमृतं तु विद्या विद्याविद्ये ईशते यस्तु सोऽन्यः ॥१॥
यो योनिं योनिमधितिष्ठत्येको विश्वानि रूपाणि योनींश्च सर्वाः ।
ऋषिं प्रसूतं कपिलं यस्तमग्रे ज्ञानैर्बिभर्ति जायमानं च पश्येत् ॥२॥
एकैकं जालं बहुधा विकुर्वन्नस्मिन् क्षेत्रे संहरत्येष देवः ।
भूयः सृष्ट्वा पतयस्तथेशः सर्वाधिपत्यं कुरुते महात्मा ॥३॥

चिदचिच्छरीरकब्रह्मणो माहात्म्यनिर्वचपूर्वकतच्छेषतयावगम्यमानजीवस्य तद्वै लक्षण्याणुत्वादिकंनिरूपयितुमवतारयतिपञ्चमोऽध्यायः द्वे अक्षरे इत्यादि । ब्रह्मपरेब्रह्माराधनस्वरूपेऽनन्ते नित्यानित्यपरिणामत्वेनासंख्यातीतव्यक्तिस्वरूपे क्षराऽमृतरूपशब्द-शब्दित इत्येतत् । विद्याविद्ये विद्यात्वेन प्रपञ्चितज्ञानकर्मपरे द्वे यत्राक्षरे प्रत्यगात्मनि गूढे निहिते सामान्यतो दुर्मोचतयासमवलग्ने सुसंश्लिष्ट इत्येतत् । एतादृशोऽन्यः पुरुषोऽस्ति । अत्रक्षरं विनाशशीलोजडवर्गस्तु अविद्याशब्दशब्दितोभवति अमृतमविना-शिवर्गस्तुविद्यापदाभिहितं भवति सोऽप्यन्य एव यस्त्वाभ्यां सर्वदासमाराध्यमानः समाराधितस्तत्तदनुरूपफलप्रदायकश्चविद्याविद्ये ईशते पूर्वोक्तमनुशासति सोऽन्यः सर्व-नियन्तेत्यर्थः । 'सर्वस्येशान' इतिश्रुतेः ॥१॥

मतविशेषे ब्रह्मरूपेणाशङ्क्यमानकपिलादितोऽप्यन्योऽयंपरेशस्ततश्च कुतस्तरां तस्य-सामान्यजीवैक्यमितिबुबोधयिषया द्वितीयंमन्त्रमवतारयति यो योनिं योनिमित्यादि । यः एकः एवसन् योनिं योनिं समष्टिव्यष्टिरूपेणप्रतियोनिं प्रतिशरीरमितियावत् विश्वानि रूपाणि जडचेतनतयाविभक्तसमस्तभूतवर्गेषु सर्वाः योनींश्च समस्तकारणवर्गेषु च सर्वतो-भावेनाधितिष्ठति सर्वंसंव्याप्यावतिष्ठति सर्वचराचररूपत्वेनाऽस्ते इत्येतत् । योह्यग्रेसर्गा-दिकालेप्रसूतंस्वसत्संकल्पेन समुत्पन्नं कपिलमृषिंहिरण्यगर्भं ज्ञानैः सर्वप्रकारकतत्त्वादि भिर्बिभर्तिसंपुष्टं करोतीत्यर्थः ''यो ब्रह्माणं विदधाति पूर्वं योवै वेदांश्च प्रहिणोति तस्मै'' इतिश्रुतेः । येन च तं जायमानं सर्वप्रथमसमुत्पद्यमानं ब्रह्माणं पश्येदैक्षत सानुग्रहमपश्यत् सोऽस्मादन्यः परपुरुष इति पूर्वेण सम्बन्धः ॥२॥

पूर्वप्रपञ्चितसर्वेशितुरनन्तब्रह्मकल्पकारकत्वाचतुर्मुखाद्यन्यदेवातिशायित्वमाहा—त्म्यंप्रतिपादयति—एकैकं जालमित्यादि । एषः सर्वातिशायिप्रत्यक्षतोऽनुभूयमानो देवः

सर्वा दिश ऊर्ध्वमधश्चतिर्यक् प्रकाशयन् भ्राजते यद्वनड्वान् ।
एवं स देवो भगवान् वरेण्यो योनिस्वभावानधितिष्ठत्येकः ॥४॥

सर्वेश्वरोऽस्मिन् क्षेत्रे प्रकृतिरूपेऽस्मिन् प्रपञ्चे सर्गसमये एकैकं जालं पृथक्पृथक्तया बुद्ध्यादिभूतकार्यवर्गं जालवदावद्धकं बहुधा नानाप्रकारेण विकुर्वन् यथातथ्येनावश्यकतानुसारं संविभक्तयन् पुनः प्रलयकालेतस्मिन्नेव स्वप्रकृतिभूते क्षेत्रेसंहरतिप्रकृतिस्थत्वेनावासयतिस्वस्मिन्नेवाऽविभक्तनामरूपगुणतां प्रापयतीत्यर्थः । असौमहामहिमशालीमहात्माऽचिन्त्यशक्तिकेशो भूयः सर्गादिकालेकल्पान्तरेऽपि तथैव पूर्वसृष्टिमनुसृत्यैव पतयः सृष्ट्वा प्रजापत्याद्युपलक्षणलक्षितप्रपञ्चं सृष्ट्वा समस्तलोकपालादिकान् समुत्पाद्येत्येतत् । तदाह स्मृतिः "सर्वभूतानि कौन्तेय प्रकृतिं यान्तिमामिकाम् । कल्पक्षये पुनस्तानि कल्पादौ विसृजाम्यहम्" सर्वभूतानि द्विपरार्धकालरूपब्रह्मणआयुः कल्पस्तस्यक्षये मामिकां मच्छरीररूपां प्रकृतिमविभक्तनामरूपां तमः शब्दाभिधेयां यान्ति तत्संकल्पाधीनत्वात् तेषां ते मत्संकल्पान्मत्प्रकृतिमाविशन्तीत्यर्थः । कल्पस्यादौ पुनस्तानि सत्यसङ्कल्पोऽहं "मनसैव जगत्सृष्टिं संहारञ्चकरोति यः" "यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्तेऽभिसंविशन्ति" इत्युक्तदिशाविसृजामीतिभावः । "सूक्ष्माचिच्चिद्द्वयेनावांविशिष्टौ प्रलये किल । सृष्टावावां विशिष्टौ तु स्थूलचिच्चिद्द्वयेन हि "जगत्सृष्ट्यादयो लीला ममेव राघवस्य च" इत्याद्यागमोक्तेः । सर्वाधिपत्यं कुरुते निगूढतया सर्वदासर्वेषां सन्नियन्तृकत्वरूपेणाऽऽस्ते । एतादृशाद्भुतशक्तिकोऽन्यः परेशश्चतुर्मुखाद्यतिशयितमाहात्म्यकमितिभावः ॥३॥

सर्वेश्वरस्यैकत्वेनसर्वेषु कथं युगपत्संस्थानत्वमुपपद्यते इति जिज्ञासाशान्त्यर्थमाह– सर्वादिश इत्यादि । अनड्वान्नसिचक्रपरिवर्तनरूपेण प्रयुक्तवत् कालचक्रपरिवर्तनहेतुत्वान्ननड्वान् रूपेणरूपीतसूर्यो यदुयथैकाक्येव सर्वादिशः ऊर्ध्वमधस्तिर्यक् च सामस्त्येनप्रकाशयन् समुद्दीपयन् भ्राजते देदीप्यमानो भवति । एवमेव सः सर्वेश्वरो भगवान् "ज्ञानशक्तिबलैश्वर्यवीर्यतेजांसि षड्गुणाः । भगत्वेनेरिताः सन्ति श्रीरामे भगवान् स तत् । श्रीरामे भगवच्छब्दोमुख्यवृत्त्या प्रवर्तते । गौण एव स चान्यत्र षड्विधैश्वर्यलेशतः" इत्यादिरूपेणाचार्यचरणविवृतो भगवान् वरेण्यो देवः सर्वजीवैर्मुक्तये सर्वदैववरणीयोभजनीयश्चैक एव योनिस्वभावान्नधितिष्ठति स्वसत्यसंकल्पोपार्जितसर्वयोनिष्वधिष्ठातृत्वेनाधिपत्यं करोतीत्यर्थः ॥४॥

यच्चस्वभावं पचति विश्वयोनिः पाच्यांश्चसर्वान् परिणामयेद्यः ।
सर्वमेतद्विश्वमधितिष्ठत्येको गुणांश्च सर्वान् विनियोजयद्यः ॥५॥
तद्वेदगुह्योपनिषत्सु गूढं तद् ब्रह्मावेदते ब्रह्मयोनिम् ।
ये पूर्वदेवा ऋषयश्च तद्विदुस्ते तन्मया अमृता वै बभूवुः ॥६॥
गुणान्वयो यः फलकर्मकर्ता कृतस्य तस्यैव स चोपभोक्ता ।
स विश्वरूपस्त्रिगुणस्त्रिवर्त्मा प्राणाधिपः सञ्चरति स्वकर्मभिः ॥७॥

"कालः स्वभावोनियति"रित्यादीनामेतदधीनत्वमाह—यच्चस्वभावमित्यादि । यद्विश्वयोनिर्योजलादिभूतवर्गाणां सर्वेषांपरमकारणमास्तेऽत्रछान्दसत्वाल्लिङ्गव्यत्ययः स्वभावञ्चोष्णानुष्णादितत्तद्गुणादींश्च पचति स्वस्वभाविकसंकल्परूपपाकेनसमवर्त्तयति यश्चसर्वानखिलान् परिणामयोग्यान् पाच्यान् पदार्थान् परिणामयेत् तत्तदाकारेण यथा यथं परिवर्तयतीत्यर्थः । यः एकः सर्वान् गुणान् विनियोजयेत् सत्वादिगुणानन्यवर्गेषु यथायथं संयोगयतीत्येतत् । एतच्च सर्वं सर्वैः प्रात्यक्षेणानुभूयमानं विश्वमधितिष्ठतिसर्वमपिजडचेतनवर्गजातमधिष्ठायसमनुशासति स एव सर्वाराध्यपरपुरुषः सैवोपासनीयोमुक्तिकामैर्नान्यः "शरण्यौ वेदनीयौ च भजनीयौहि मुक्तये" इत्यागमोक्तेः ॥५॥

चतुर्मुखादिदेवानामृषिप्रभृतीनामपि चेदशब्रह्मवेदनान्मुक्तिरित्यस्यैवोपास्यत्वमाह—तद्वेदगुह्येत्यादि । तद्वेदगुह्योपनिषत्सु सर्वप्रसिद्धवेदेषु वेदान्ततया प्रसिद्धभगवद्रहस्यप्रकाशनपरकोपनिषत्सु च गूढमतिगहनतया तात्पर्यविषयत्वेन स्थितं ब्रह्मयोनिं ब्रह्मणो वेदस्य योनित्वेनावगतं तत् परंब्रह्मब्रह्मासर्ववेदप्रसारकश्चतुर्मुखोवेदते जानाति ये च पूर्वदेवाः सर्वेशसमुपासकाः पुरातना देवाः ऋषयश्चसाधकऋषिगणाश्चेत्यर्थः । तद्विदुर्याथातथ्येन तत्स्वरूपं ज्ञातवन्तोऽतस्ते सर्वेऽपि तन्मयाः सर्वेशपरब्रह्माकारतया आविर्भूतगुणाष्टकत्वेन ब्रह्मसमानाकारतामवाप्ता इत्येतन्नतुतदभिन्नतां गताः "उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः" "जगद्व्यापारवर्जं समानो ज्योतिषा" इत्यादिशास्त्रविरोधात् सन्तोऽमृताः बभूबुः मुक्ता जाता मरणधर्मविवर्जितत्वेन सायुज्यं गता इत्यर्थः । अतः साधकैः सैव सर्वेशोसाध्यो नान्यः "नान्यः पन्थाविद्यतेऽयनाय" इतिश्रुत्युक्तेः वै शब्दश्च सत्यसन्धःप्रतिश्रुत्य प्रपन्नायाभयं स्वयम् । निवर्तयेद्भयेनैनं श्रीरामः श्रितवत्सलः" इतिस्मृतिप्रपञ्चितश्रीरामशरणापन्नजीवानां सर्वदासर्वाभयत्वंव्यनक्तिः ॥६॥

पूर्वप्रकरणेसर्वाराध्यपरेशरूपंतज्ज्ञानस्य मोक्षसाधनत्वञ्चोपवर्णितम् । तत्राहमस्मीत्यादिरूपेण देवैः ऋषिभिश्चविधीयमानमुपासनं जीवब्रह्माद्वैतपरं भवेदित्यासंकास्पदमा-

कलय्यात्यन्ताणोर्जीवस्यमहता ब्रह्मणा ऐक्यायोगंतत्रोपासनायां शेषशेषित्वेनशरीरात्मभावापन्नविशिष्टैक्यपरकत्वमेवेति बोधयितुञ्च जीवाणुत्वस्वरूपं वर्णयति—गुणान्वय इत्यादि। यो जीवोगुणान्वयः सत्वरजस्तमोभेदविभिन्नानां गुणानामन्वयस्तत्राबद्ध इत्येतत्। सत्त्वादिगुणसंबद्धं सद् यद् यद् भोगफलसाधनरूपं कर्म तत् करोति भुङ्क्ते चेत्यर्थः। तदाहुर्जगद्गुरवः श्रीपूर्णानन्दाचार्यचरणाः श्रीबोधायनमतादर्शे—

"ज्ञातेति कथनाज्जीवे कर्तृत्त्वमपि सिद्धयति। सामानाधिकरण्येन ज्ञानकर्तृत्त्वयोस्ततः।
'चेतनोऽहं करोमीति' प्रतीतिरूपपद्यते। कर्तृत्वमात्मनो धर्मो 'भोक्ताभोग्यमितिश्रुतेः।
चेतनस्यात्रकर्तृत्वं भोक्तृत्वेहि प्रयोजकम्। अन्यः करोतिभुंक्तेऽन्यः कथञ्चिन्नोपपद्यते।
प्राज्ञैश्चकर्मकर्त्तुर्हि सम्मतं कर्मणः फलम्। 'आत्मेन्द्रियमनोयुक्तंभोक्तेत्याहुर्मनीषिणः'।
इति श्रुतिप्रमाणत्वात् कर्तृत्वं नात्मनो ननु। किन्त्वन्तः करणस्थं तदध्यस्तमात्मनीति नु।
मैवं प्रतीयते चात्र कर्तृता मनसो न यत्। किन्तूपकरत्वंवैभोक्तृत्वे चात्मनो मतम्।
अन्यथा चेन्द्रियादेश्चकर्तृत्वं संभवेत्खलु। कर्तृत्वमात्मनस्तस्मान्नैषा श्रुतिर्निषेधति।
'कर्त्ताशास्त्रार्थवत्त्वाद्' वै व्यासेनसूत्रितं ततः। ततश्चाहं करोमीति प्रतीतिरुपपद्यते।
यद्यात्मनोन कर्तृत्वं शास्त्राणां व्यर्थता भवेत्। 'हन्ताचेन्मन्यतेहन्तुं हतश्चेन्मन्यते हतम्।
उभौतौ न विजानीतोनायं हन्ति न हन्यते। नन्वेवं प्रतिसिद्धाचद्यात्मनो हन्तृताश्रुतौ।
इतिचेन्नात्मनित्यत्वाद् हन्तृता वर्जिता यतः। प्रकृतेः क्रियमाणानिगुणैः कर्माणि सर्वशः।
अहङ्कारविमूढात्मा कर्त्ताहमिति मन्यते। इत्येवं ननु गीतायां निषिद्धा कर्तृतात्मनः।
उदीरितश्चगीतायामुत्तरत्रायमाशयः। न स्वरूपप्रयुक्तंहि गुणसंसर्गतो यतः।
मैवं जीवस्य कर्तृत्वं संसारिकप्रवृत्तिषु। पञ्चैतानिमहाबाहो कारणानिनिबोध मे।
अधिष्ठानं तथा कर्त्ता करणं च पृथक् विधम्। विविधाश्च पृथक्चेष्टादैवं चैवात्रपञ्चमम्।
शरीरवाङ्मनोभिर्यत् कर्मप्रारभते नरः। न्याय्यं वा विपरीतं वा पञ्चैते तस्यहेतवः।
तत्रैवं सति कर्त्तारमात्मानं केवलं तु यः। पश्यत्यकृतबुद्धित्वान्न स पश्यति दुर्मति।
प्रश्नोपनिषदि 'कर्त्ता' स्पष्टं जीवः समीरितः। ग्रहणस्यविहारस्य चात्मनः कथनाच्छ्रुतौ
आत्मनश्चैवकर्तृत्वंबादरायणसम्मतम्। विज्ञानं यज्ञं तनुते कर्माणि तनुतेऽपि च'।
तैत्तरीयेऽपि चेत्येवं कर्तृत्वमात्मनः श्रुतम्। बुद्धेरेवहि कर्तृत्वं सांख्यास्तु प्रवदन्ति हि।
सम्भवेच्चतथात्वे तु बुद्धेरेवहिभोक्तृता। कर्तृत्वे च मते बुद्धेः समाधिश्च भवेन्न हि।
आत्मनः कर्तृतातस्मात्सिद्धान्तेस्वीकृताखलु। तक्षावत् स्वेच्छयाचात्मा करोति नकरोतिच
जडबुद्धेस्तु कर्तृत्वे व्यवस्थैषानसम्भवेत्। स्वायत्तं राघनायत्तं वा कर्तृत्वं किमात्मनः।

अङ्‌गुष्ठमात्रोरवितुल्यरूपः संकल्पाहङ्कारसमन्वितो यः ।
बुद्धेर्गुणेनात्मगुणेन चैव आराग्रमात्रोह्यवरोऽपि दृष्टः ॥८

जीवस्य भोक्तृता तस्मात् पक्षश्चाद्योमनोहरः । विधिनिषेधशास्त्राणां वैयर्थ्यं चान्यथाभवेत् पिप्पलंस्वादुचात्तीति जीवस्य भोक्तृता श्रुतौ । इति चेन्न यतो जीवेराघवाधीन कर्त्तृता । 'अन्तः प्रविष्टःशास्ते'ति श्रुतौरामोहि शासकः। विधिनिषेधशास्त्राणां वैयर्थ्यं हि तथा ननु मैवं जीवस्य यत्नं यद्वीक्ष्य स्वानुमतिं खलु । रामो दत्ते ततो जीवोयोग्यो विधिनिषेधयोः तथा प्रवर्त्तते चाथ फलदाने तु चात्मनः। वैषम्यं चाथनैर्घृण्यं मन्येते राघवे न तु । अवोचद्भगवांश्चैवंगीतायां स्वयमेवहि । 'तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम् । ददामि बुद्धियोगं तं येनमामुपयान्ति ते । तानहं द्विषतः क्रूरान् संसारेषु नराधमान् । क्षिपाम्यजस्रमशुभानासुरीष्वेवयोनिषु । 'एष एव साधुकर्मेत्यादिश्रुति प्रमाणतः । अखिलं चात्मकर्तृत्वं रामाधीनं हि मन्यते । कर्तृत्वं राघवाधीनं निर्दोषं श्रुति सम्मतम् । विशिष्टाद्वैतसिद्धान्ते जीवस्य मन्यते ततः (९६७–९९९) इति ।

तथैव श्रौतप्रमेयचन्द्रिकाकाराः "ईशाधीनोहि जीवात्मा लोके कर्म करोति तत् । ईशदत्तं फलं भुङ्क्ते जीवः स्वकृतकर्मणः" (५।२७) "कर्त्ताशास्त्रार्थवत्त्वात्" इतिसूत्रवृत्तौ जगद्गुरुश्रीदेवानन्दाचार्यचरणा अपि "आत्मा कर्त्ता नतु प्रकृतिः 'ज्योतिष्टोमेन स्वर्गकामोयजेत' इत्यादिशास्त्राणामप्रवृत्तस्य पुरुषस्य प्रवर्त्तकबोधोत्पादनद्वारा प्रवृत्त्युत्पादनेनार्थवत्त्वात् । अन्तः करणस्य प्रवर्त्त्यत्वस्वीकारे तु तस्याचेतनत्वेन प्रवर्त्तकबोधोत्पादनासम्भवाच्छास्त्रवैफल्यमनिवार्यमेवेति" (श्रीबोधायनवृत्तिसारः २।३।४) इत्याहुरतः सः फलकर्मकर्ता फलोद्देश्यपूर्वककर्मसम्पादकः स एव च तस्यैव शुभाशुभात्मकस्वकृतस्यैव कर्मफलस्योपभोक्ता भोगकर्तापीति शेषः । उक्तरूपेण रूपितो विश्वरूपः स्थावरजङ्गमादिभेदभिन्नस्त्रिगुणः कामक्रोधलोभाख्यगुणत्रययुक्तः सन् त्रिवर्त्मा स्वोपार्जितकर्मानुसारेण देवयानपितृयाणकष्टकगतियानरूपगतित्रययुक्तः प्राणाधिपः प्राणानामधिपः आश्रयस्थानं तत्सहचरितः सन्नित्येतत् सः स्वकर्मभिः स्वप्रवर्तितकर्मपाशसंबद्धःसन् सञ्चरतितत्तत्फलभोगकाले तत्तद्योनिषु विचरतीत्यर्थः ॥७॥

पूर्वमन्त्रोदितजीवस्वरूपमेव प्रपञ्चयति–अङ्गुष्ठमात्र इत्यादि । योंऽगुष्ठमात्रः "अङ्गुष्ठमात्रपुरुषं निश्चकर्षयमोबलान्" इत्युक्त्यातत्परिमाणवान् रवितुल्यरूपः स्वप्रकाशरूपो बुद्धेर्गुणेनान्तः करणस्य सत्वादिगुणेनाध्यवसायात्मके नात्मधर्मभूतेन संकल्पाहङ्कारसमन्वितः "आढ्योऽभिजनवानस्मि" इत्यादिरूपेणतत्तत्कार्येतत्तत्कार्यानु-

वालाग्रशतभागस्यशतधा कल्पितस्य च ।
भागोजीवः स विज्ञेयः स चानन्त्यायकल्पते ॥९॥
नैव स्त्री न पुमानेष न चैवायं नपुंसकः ।
यद्यच्छरीरमादत्ते तेन तेन स युज्यते ॥१०॥
संकल्पनस्पर्शनदृष्टिहोमैर्ग्रासाम्बुवृष्ट्याऽऽत्मविवृद्धजन्म ।
कर्मानुगान्यनुक्रमेणदेही स्थानेषुरूपाण्यभिसम्प्रपद्यते ॥११

कूल्येन युक्तः सन्नात्मगुणेनात्मवत् स्वप्रकाशस्वरूपश्चैवाराग्रमात्रश्चर्मसूच्यग्रभागपरिमाणत्वान् ततोऽप्यवरः सूक्ष्मपरिमाणत्वान् जीवः शास्त्रेषु तज्ज्ञैर्दृष्टः प्रत्यक्षसमानाकारतयानुभूत इति ॥८॥

प्रस्तुतोऽयंजीवात्माऽत्यन्ताणुरितिस्वमतमाह—वालाग्रेत्यादि । वालाग्रशतभागस्यतस्यापि शतधाकल्पितस्याग्रभागशतांशशतांशरूपपरिमाणस्येति यावत् यद् भागोभवति स एव जीवोविज्ञेयस्तादृशपरिमाणयुक्तो जीवोज्ञातव्य इत्यर्थः । उपदर्शितपरिमाणयुक्तश्चजीवोऽत्यन्ताणुत्वेऽपिमोक्षसमयेविमुक्तस्वरूपाऽनन्त्याय कल्पते स्वधर्मभूतज्ञानविकासेनानन्तत्वासीमत्वापरिच्छिन्नत्वश्चाधिगच्छतीत्यर्थः । एतेन जीवस्यनियतपरिमाणत्वं मध्यमपरिमाणत्वं वा तिरस्कृत्याणुपरिमाणवत्वमेव संस्थापितं श्रुत्याऽत्रैवसर्वशास्त्रसङ्गतेरिदिक् ॥९॥

पूर्वप्रतिपादितस्य जीवात्मनो लोके सामान्यतः स्त्रीत्वादिलिङ्गत्रये प्रसिद्धत्वात्तस्य च सावयवत्वेनानुभूयमानत्वात्कथं तस्यात्यन्ताणुत्वमिति शङ्कामपनोदनायप्राह—नैवस्त्रीत्यादि । एषोजीवात्मा वस्तुतो नस्त्री न पुमान् न चैवायं नपुंसकादिकं यद् यद् भोगायतभूतंशरीरमादत्ते स्वीकरोति स तदा तेन तेन तत्तद्रूपेणेति यावत् युज्यते स्वकर्मफलोपभोगसमयेततदाकारत्वेन तत्र तत्र युक्तो भवति नतुतस्य स्वाभाविकत्वंतत्त्वमित्यर्थः । "विकारञ्चरामोदयाब्धिस्तथात्वे दयाशून्यतां पक्षपातञ्चनैति । प्रकारे विकारस्तथाचित्रसृष्टौ च हेतुर्यतः प्राणिनां प्राचयकर्म" इत्याचार्योक्तदिशा जीवकर्मस्वारस्यात् शरीरगतमेव स्त्रीत्वादिकं नतु स्वात्मगतमितिदिक् ॥१०॥

जीवात्मनः प्रकृतशरीरप्राप्तौकारणं किमितिजिज्ञासायामाह—संकल्पनेत्यादि । संकल्पनस्पर्शनदृष्टिहोमैः शास्त्रविहितपुण्यविधायकसत्यसंकल्पैः सरयूगङ्गाप्रभृतिपुण्यलक्षणजलवस्तुस्पर्शैः शास्त्रानुमोदितपुण्याधायकवस्तुसुदृष्टिपातैः पुण्योत्पादकशास्त्रमोदितहोमैर्यागादिविशेषैस्तथाग्रासाम्बुवृष्ट्या भोजनजलपानवृष्ट्यादिभिः "आहारशुद्धौ

स्थूलानि सूक्ष्माणि बहूनि चैव रूपाणि देही स्वगुणैर्वृणोति ।
क्रियागुणैरात्मगुणैश्च तेषां संयोगहेतुरपरोऽपि दृष्टः ॥१२॥
अनाद्यनन्तं कलिलस्य मध्ये विश्वस्यस्रष्टारमनेकरूपम् ।
विश्वस्यैकं परिवेष्टितारं ज्ञात्वा देवं मुच्यते सर्वपाशैः ॥१३॥

सत्वशुद्धिः'' इत्यादिश्रुत्युक्तदिशा सर्वेशसन्निवेदितविशुद्धाहारैः ''दातव्यमिति यद्दानं दीयतेऽनुपकारिणे । देशे काले च पात्रे च तद्दानं सात्विकं स्मृतम्'' इतिस्मृत्युक्तदिशा योग्यायोग्येषु ग्रासम्बुदानादिप्रदानं पुण्यपापहेतुर्भवतीति शास्त्रमर्यादा वृष्ट्यादेरपि-तथैवौवृश्चूछेदन इतिनिष्पन्नत्वात्तस्य । अनर्थोच्छेदनमनर्थवतां पुण्यहेतुरर्थोच्छेदन-मर्थवताञ्चपापहेतुरितितात्पर्यम् । ततश्चतत्तद्हेतुकं तत्तच्छरीरधारणमितिविवेकः । आत्म-विवृद्धिजन्मजीवात्मनो विवृद्धिजन्मदेवमनुष्यादिप्रकृष्टयोनिषु जन्मभवत्यतोदेही जीवात्मा स्थानेषु स्वकर्मसंकल्पानुगुण्येन तेषु तेषु ब्राह्मणस्त्रीनपुंसकादियोनिषु कर्मानुगानि स्वकर्मानुसरणशीलानि स्वसंकल्पानुगानीतियावत् रूपाणि तत्तच्छुभाशुभसंकल्प-लक्षितानिहेयोत्कृष्टादिनि शरीराणि ''यं यं वापिस्मरन् भावं त्यजत्यन्ते कलेवरम् । तं तमेवैति कौन्तेय ! सदा तद्भावभावितः'' इतिस्मृतेः । अनुक्रमेण भोगानुकुल्यसंक-ल्पपर्यायेणाभिसम्प्रपद्यते यावत्कर्मफलभोगंभूयो भूयः संप्राप्नोतीतिशेषः ॥११॥

जीवात्मनोभूयोभूयोनानायोनिग्रहणेकारणान्तरमपिदर्शयति—स्थूलानिसूक्ष्माणीत्यादि । देहीक्रियागुणैः स्वसंस्कारोद्भूतकर्मभिरात्मगुणैः स्वगुणैश्च तत्तत्फलप्रयुक्तयागादिलक्षण गुणैराबद्धः सन् स्थूलानि सूक्ष्माणि चैव बहूनि देवमनुष्यमातङ्गमसकप्रभृतीनि रूपाणि स्वरूपाकृतिविशेषाणि वृणोति तत् तत्फलभोगाय स्वीकरोतोति तेषां तत्र तत्र संयोग हेतुरयमपरोऽपि दृष्टः शास्त्रेष्विति शेषः । जीवानां स्वकृतकर्मैवतादृशात्मयोगेहेतुरिति विवेकः ॥१२॥

पूर्वोक्तप्रकारेणप्रत्यगात्मनः स्वरूपमभिधाय तत्प्राप्यस्वरूपमभिधत्ते अनाद्यनन्त मित्यादि । कलिलस्य स्वकार्यरूपातिविचित्रसंसारस्य मध्ये संस्थितत्वाऽनाद्यनन्तमादि मध्यावसानविवर्जितमचिन्त्यमितियावत् । विश्वस्य स्रष्टारं हिरण्यगर्भाद्यनेकरूपेण जगत्सृष्टिविधातारं ''तत्सृष्ट्वा तदेवानुप्राविशत्'' इतिश्रुतेः । अनेकरूपमनन्तानन्तस्व रूपत्वेनविश्वस्य परिवेष्टितारं सर्वतोभावेनसमव्याप्यस्थितमेकमद्वितीयंसमाभ्यधिक-विवर्जितं देवं सर्वेश्वरं देवशब्दवाच्यं श्रीरामं ज्ञात्वा सर्वपाशैः सांसारिकसमस्तबन्धनै-र्मुच्यते श्रीरामसायुज्यं लभते इत्यर्थः ॥१३॥

भावग्राह्यमनीडाख्यं भावाभावकरं शिवम्।
कलासर्गकरं देवं ये विदुस्ते जहुस्तनुं तेजहुस्तनुम् ।१४।

इति श्वेताश्वतरोपनिषदः पञ्चमोऽध्यायः

पूर्वं ये देवा ऋषयश्च तद्विदुस्तेऽमृता बभूबुरिति बहुनामुपासनद्वारा सायुज्याप्तिरितिप्रपञ्चितं तच्चैवं भूतजीवविलक्षणस्याराधनेनेत्युपसंहरन्नाह—भावग्राह्यमित्यादि । भावग्राह्यं भावोऽत्रपरेशस्वरूपविषयिण्यतिशयिताश्रद्धा भक्त्यपरपर्याया तेन ग्राह्यंप्राप्तुं शक्यमितियावत् "नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनुंस्वाम्" इतिश्रुतेः । "रामो ब्रह्मपरात्परं श्रुतिमतं भक्त्यैव निःश्रेयसम्" (श्रीबोधायनपञ्चके ज.गु. श्रीसदानन्दाचार्याः) "रामस्य ब्रह्मणोऽनन्यभक्त्यैवमुक्तिराप्यते" (साधनदीपिकायां ज.गु. श्रीगङ्गाधराचार्याः) "घृतंजलात्तथातैलं सिकतातश्चनिःसरेद् । तथापि भगवद्भक्तिं विनामुक्तेर्न सम्भवः" (योगपञ्चके ज.गु. श्रीदेवानन्दाचार्याः) "भक्त्यैव मुक्तिदाता स स्वप्रपत्त्या तथैव च" (श्रौतप्रपेरवन्द्रिकायां ज.गु. श्रीश्रियानन्दाचार्याः) इत्याद्याचार्यप्रवराणामुक्तेश्च । अनीडाख्यमनाधाररूपेणाऽऽख्यायमानमनिलयत्वमितिशास्त्रप्रसिद्धमिति भावः । भावाभावकरमुत्पत्तिस्थितिसंहारप्रक्रियापकं जगत्सृष्ट्यादिसर्वलीलासम्पादकमितियावत् शिवमशुभास्पृष्टं सदैकरूपत्वेन कल्याणनिलयमितियावत् । कलासर्गकरं सद्विद्याद्यनन्तकलोद्भूतस्थानं देवं "यतो वा इमानिभूतानि जायन्ते" "जन्माद्यस्य यतः" "जगत्सृष्ट्याद्योलीला ममैव राघवस्य च" इत्यादिरूपेण श्रुतिस्मृत्यादिभिः प्रबोधितं सर्वेश्वरश्रीरामं ये शास्त्रोक्तदिशा समुपासका विदुस्ते तनुं स्वकर्मभोगसाधनभूतंशरीरं जहुः । प्रकृतेर्मुक्ता भूत्वा श्रीरामसायुज्यमवापुरित्येतत् । अध्यायसमाप्तिसूचिका द्विरुक्तिः ॥१४॥

इति श्वेताश्वतरोपनिषदोभगवच्छ्रीरामानन्दाचार्यप्रणीतानन्दभाष्येपञ्चमोऽध्यायः

॥ अथ षोष्ठोऽध्यायः ॥

स्वभावमेके कवयो वदन्ति कालं तथान्ये परिमुह्यमानाः ।
देवस्यैष महिमा तु लोके येनेदं भ्राम्यते ब्रह्मचक्रम् ॥१॥
येनावृतं नित्यमिदं हि सर्वं ज्ञः कालकालो गुणी सर्वविद्यः ।
तेनेशितं कर्मविवर्त्तते ह पृथ्व्यप् तेजोऽनिलखानि चिन्त्यम् ॥२॥

अथाध्यायपञ्चकाभिहितानर्थाननूद्य 'धर्मावहं पापनुदं भगेशं' 'परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रियाचे'त्यादिना विशिष्य परब्रह्मणः श्रीरामस्य कल्याणगुणानभिधातुं प्रवर्त्ततेऽयमन्तिमः षष्ठोध्यायः—स्वभावमिति । तत्र 'कालस्वभावो नियतिर्यदिच्छा भूतानि योनिः पुरुष इति चिन्त्यम्' (श्वेताश्वतर १।२) इति प्रथमाध्यायोक्तमर्थमनुवदन्नाह—एक इति । ऐके केचन कवयोविद्वांसः । लोकायतिका इत्यर्थः । जगच्चक्रपरिवर्त्तने कारणभूतं स्वभावं वदन्त्युदीरयन्ति । एतेन वेदबाह्यकारणवादिन उपलक्षिताः परिमुह्यमाना भगवन्मायया मोहं प्रापिता अन्य इतरे वैदिकाभासा इत्यर्थः । कालं जगच्चक्रपरिवर्त्तनकारणं वदन्ति । अत्र 'तु' शब्दः पूर्वपक्षं व्यावर्त्तयति । तथा च स्वभावकालयोर्जगत्कारणत्वं निरस्यन् सिद्धान्तयति—देवस्यैषमहिमेति । लोके देवस्य ब्रह्मादीनां वाचकोऽयं मन्त्रोऽन्वर्थादिसंज्ञकः । जप्तव्यो मन्त्रिणा नैनं विना देवः प्रसीदति ।" (रामपूर्वता० ११) 'भवान् नारायणो देवः' (वा.रा.यु.का. ११७।१४) 'श्रीरामचन्द्रं हरिमादिदेवं परात्परं राममहं भजामि ।।' (सनत्कुमारसं.) इत्यादिश्रुतिस्मृतिप्रामाण्याद् देवशब्दवाच्यस्य भगवतः श्रीरामस्यैव महिमा सङ्कल्पो येन महिम्नेदं ब्रह्मचक्रं ब्रह्माश्रितं जगच्चक्रं प्रकृतिप्राकृतचक्रं वा भ्राम्यते ।।१।।

नियतिरपि न स्वातन्त्र्येण कार्यं करोत्यपि तु देवप्रेरणयैवेत्याह—येनेति । येन भगवता श्रीरामेण नित्यमिदं सर्वं चेतनाचेतनात्मकमखिलं विश्वमावृतं व्याप्तं हि । य श्रीरामोनित्यं सर्वव्यापक इत्यर्थः । यश्च ज्ञः सर्वज्ञः कालस्यापि कालः कालकालः कालस्यापि नियन्ता प्रशस्ता गुणा सन्त्यस्येति गुणी कारुण्याद्याश्रयणीयौपार्थककल्याणगुणगणार्णवोयः सर्वं वेत्तीति सर्ववित् सर्वाविद्या यस्य स सर्वविद्यो वा । ज्ञः सर्वविदित्यत्र 'यः सर्वज्ञः सर्वविदितिवन्न पुनरुक्तिर्भगवतः श्रीरामस्य सामान्यविशेषोभयविषयक ज्ञानाश्रयत्वात् । क्रियत इति कर्म नियतिशब्दवाच्यं जीवविहितं पुण्यपापलक्षणं कर्म हतेन भगवता श्रीरामेणेशितं स्यादिति सङ्कल्पमात्रविषयीकृतं सन् पृथिव्यप्तेजोऽनिलखानि पृथिव्यप्तेजोनिलाकाशरूपेण विवर्त्तत विशेषेणवर्त्तते । निष्पन्नं भवतीत्यर्थः । इति चिन्त्यमित्थं विचारणीयम् ।।२।।

तत् कर्मकृत्वा विनिवर्त्यभूयस्तत्त्वस्य तत्त्वेन समेत्ययोगम् ।
एकेन द्वाभ्यां त्रिभिरष्टभिर्वा कालेन चैवात्मगुणैश्च सूक्ष्मैः ॥३॥
आरभ्य कर्माणि गुणान्वितानि भावांश्च सर्वान् विनियोजयेद् यः ।
तेषामभावे कृतकर्मनाशः कर्मक्षये याति स तत्त्वतोऽन्यः ॥४॥
आदिः स संयोगनिमित्तहेतुः परस्त्रिकालादकलोऽपि दृष्टः ।
तं विश्वरूपं भवभूतमीड्यं देवं स्वचित्तस्थमुपास्य पूर्वम् ॥५॥

अथ 'पुरुष इति चिन्त्यम्' (श्वेताश्वतर १।२) इत्युक्तस्य कर्मणायोगेन च सिद्धिमवाप्तस्य जीवापरपर्यायस्य पुरुषस्य कारणत्वपक्षं निरस्यति—तत्कर्मेतिद्वाभ्याम् । अन्येभ्यः काम्यकर्मभ्यो विनिवर्त्यतत्त्वस्य "यत्परं यद् गुणातीतं यज्ज्योतिरमलं शिवम् । तदेव परमं तत्त्वं कैवल्यपदकारणम् ॥" (श्रीरामस्तवराज ५) इतिसनत्कुमारसंहितावचनप्रामाण्यात् परमतत्वस्य भगवतः श्रीरामस्य तदर्थं कर्म तत्कर्म समाराधनबुद्ध्या नित्यनैमित्तिकं कर्मभूयोऽनेकजन्मसु कृत्वाविधायैकेन जनिसमये भगवच्छ्रीरामकृपाकटाक्षेण गुरुपसदनेनवा, द्वाभ्यां'यस्य देवे परा भक्तिःयथा देवे तथा गुरौ ।"(श्वेताश्वतर६।२३) इतिश्रुत्युक्तदेवगुरुभक्तिभ्याम् , त्रिभिर्बाल्यपाण्डित्यमौनैः श्रवणमनननिदिध्यासनैर्वा, अष्टभिर्यमनियमासनप्राणायामप्रत्याहारध्यानधारणासमाधिपदवाच्यैरष्टभिर्योगाङ्गैश्च । अत्र वा शब्दश्चार्थे । कालेन मोक्षोपयोगिसमयेनात्मगुणैः प्रजापतिवाक्याभिहितायहतपाप्मत्वादिभिरष्टभिरात्मगुणैः सूक्ष्मैर्बहुजन्मानुष्ठितपुण्यसंस्कारैश्च विशिष्टः सन् तत्वेन सर्वेश्वर श्रीरामेण योगं शेषत्वज्ञानात्मकयोगं समेत्यावाप्यगुणान्वितानि प्रारब्धत्वगुणविशिष्टानि । भगवत्प्रीत्यप्रीत्यात्मकत्वगुणविशिष्टानीत्यर्थः । कर्माण्यारभ्यावलम्ब्यसर्वान् विश्वान् भावान् कामाँश्चयोविनियोजयेद्भुनक्ति । तेषां कर्मफलभोगानामभावेऽन्ते कृतकर्मनाशो भगवदुपासनेनोत्तरपूर्वाघाश्लेषविनाशविशिष्टः स भगवद्भक्तः कर्मक्षये प्रारब्धकर्मक्षये यात्यवाप्नोति । ब्रह्मेति शेषः । स तत्वतो परमतत्वाद् भगवतः श्रीरामादन्यः । अतः पुरुषपदवाच्यः सजीवो न जगत्कारणमित्यर्थः । अत एवोक्तं शारीरकमीमांसायां भगवद्भिर्बादरायणैः "जगद्व्यापारवर्जं प्रकरणादसन्निहितत्वाच्च ।" (ब्रह्मसूत्र ४।४।१७) इति । तदाहुर्वृत्तिकाराः श्रीपुरुषोत्तमाचार्यबोधायनमहाभागाः "जगद्व्यापारवर्जंसमानोज्योतिषा" इति ॥३-४॥

अथ परमात्मोपासनस्य स्वात्मोपासनान्तरकर्त्तव्यतामाह—आदिरिति । स पूर्वमन्त्राभिहितो जीवः सम्यग् योगः संयोगस्तत्र यानि पूर्वोक्तानिनिमित्तानि तेषां हेतु-

स वृक्षकालाकृतिभिः परोऽन्यो यस्मात् प्रपञ्चः परिवर्त्ततेऽयम् ।
धर्मावहं पापनुदं भगेशं ज्ञात्वाऽऽत्मस्थममृतं विश्वधाम ॥६॥
तमीश्वराणां परमं महेश्वरं तं देवतानां परमञ्च दैवतम् ।
पतिं पतीनां परमं परस्ताद् विदाम देवं भुवनेशमीड्यम् ॥७॥

रादिः सम्यक् परमात्मावाप्तौ प्रधानं कारणं कालाद् भूतादिकालत्रयात् परः । कालत्रयपरिच्छिन्नपर इत्यर्थः । न विद्यन्ते कला यस्य सोऽकलोनिरवयवोऽपि दृष्टः । शास्त्रेष्वितिशेषः । तं विश्वरूपं कर्माधीनत्वेनामितदेहं भवभूतं संसारितामवाप्तमीड्यं स्तुत्यं देवं द्योतमानस्वभावम् । स्वप्रकाशज्ञानस्वरूपमिति यावत् । स्वचित्तस्थं स्वहृदये स्थितं तं स्वात्मानमुपास्य यस्मादयं प्रपञ्चश्चिदचिदात्मकः प्रपञ्चः परिवर्त्तते स परः परमात्मा वृक्षकालाकृतिभिरत्र तृतीया 'अन्यदाहुर्विद्यया' इत्यादिवत् पञ्चम्यर्थे । वृश्च्यते विद्यत इति व्युत्पत्या प्रकृतिवाचकोऽत्रवृक्षशब्दः । आकाररूपार्थविवक्षणे वैय्यर्थ्यादत्राकृतिशब्द आसमन्तात् कृतिर्यस्येत्येवं कृतिमतो जीवस्य वाचकः । तथा च स परमात्मा प्रपञ्चापरिवर्त्तकेभ्यः प्रकृतिकालजीवेभ्योन्यो भिन्नोऽस्तीति शेषः । धर्मावहं ज्ञानोत्पत्यनूलसत्कर्मप्रवर्त्तकं पापानुदं ज्ञानोत्पत्तिप्रतिबन्धपापापनोदकं भगेशम् ''ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रियः । ज्ञानवैराग्ययोश्चैवषण्णां भग इतीरणा'' इत्यत्रोक्तज्ञानाद्यैश्वर्यषट्केश्वरम् । उक्तञ्च बोधायनवृत्तिकारभगवत्पुरुषोत्तमाचार्यशिष्यवर्यैर्जगद्गुरुश्रीगङ्गाधराचार्यैः श्रीरामभगवत्त्वे—

''ज्ञानशक्तिबलैश्वर्यवीर्यतेजांसि षड्गुणाः । भगत्वेनेरिताःसन्ति श्रीरामे भगवान् स तत् श्रीरामे भगवच्छब्दो मुख्यवृत्या प्रवर्त्तते । गौण एव स चान्यत्रषड्विधैश्वर्यलेशतः॥३॥इति विश्वधाम विश्वस्याधारभूतममृतं मरणशून्यम् । नित्यमित्यर्थः । स्वात्मस्थमन्तर्यामिरूपेण स्वात्मऽन्यवस्थितं तं परमात्मानं ज्ञात्वोपास्य मुक्तो भवतीति शेषः ॥५-६॥

अथ परमात्मज्ञानार्थं प्रार्थयति—तमीति । ईश्वराणां जगत्सृष्ट्याद्दिसमर्थानाञ्चतुर्मुखविष्णुशिवानां परममुत्कृष्टं महाँश्चासावीश्वरोमहेश्वरस्तं महेश्वरं महेशानं देवतानां मनुष्याद्यपेक्षयाधिकदेवनशक्तिविशिष्टानामिन्द्रादिदेवानां मध्ये परमं देवतैवेति दैवतं पान्तीति पतयस्तेषां पतीनां विश्वपालकानां मध्ये परमं पतिम् । ''पतिं विश्वस्ये''ति श्रुतेः । देवं द्योतमानस्वरूपम् । स्वयम्प्रकाशज्ञानानन्दस्वरूपमिति यावत् । ''ॐ यो वै श्रीरामचन्द्रः स भगवान् यश्च ब्रह्मा विष्णुरीश्वरो यः सर्वदेवतात्मा भूर्भुवः स्वस्तस्मै वै नमो नमः ॥'' (श्रीरामोत्तरतापनीयोपनिषत्) ''योगीन्द्रसंघैः शतसेव्यमानं नारायणं निर्मलमादिदेवम्'' ''विज्ञानहेतुं विमलायताक्षं प्रज्ञानरूपं स्वसुखैकहेतुम् ।

न तस्य कार्यं करणं च विद्यते न तत्समश्चाभ्यधिकश्चदृश्यते ।
पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च ॥८॥

श्रीरामचन्द्रं हरिमादिदेवं परात्परं राममहं भजामि'' (सनत्कुमारसंहितायां श्रीरामस्तवराजः) ''भवान् नारायणोदेवः (वाल्मीकिरा०यु०) इत्यादिवचनानि भगवतः श्रीरामस्य देवत्वपरात्परात्वं च प्रमाणयन्ति। भुवनानामीशं भुवनेशं निखिललोकनियामकम्। ''भवाब्धिपोतं भरताग्रजं तं भक्तप्रियं भानुकुलप्रदीपम्। भूतत्रिनाथं भुवनाधिपत्यं भजामि रामं भवरोगवैद्यम् ॥'' ''त्रैलोक्यनाथं सरसीरुहाक्षम्'' (श्रीसनत्कुमारसंहिता) इत्यादिपाञ्चरात्रवचनप्रामाण्यात्। ईड्यं सर्वेषां देवमुनीनां स्तवनीयं तं प्रस्तुतं परमात्मानं सर्वेश्वरं श्रीरामं वयं विदाम जानीमः। अत्र प्रार्थनायां लोट्लकारः। अत्र ''शम्भुरीशः पशुपतिः शिवः शूली महेश्वरः'' (अमरकोष) इति कोषबलान्महेश्वरपदे रूढिर्नशङ्कनीया। कुतः? ईश्वराणामिति प्रतिनिर्देशात् अतएव श्रुतौ पञ्चरात्रे च भगवति श्रीरामे महेश्वरशब्दः प्रयुक्तः। तथाहि—

ॐ यो वै श्रीरामचन्द्रः स भगवान् यश्च महेश्वरो भूर्भुवः स्वस्तस्मै वै नमो नमः ॥'' (श्रीरामोत्तर०) ''वन्दामहे महेशानं चण्डकोदण्डखण्डनम्। जानकीहृदयानन्दं चन्दनं रघुनन्दनम् ॥ (सनत्कुमारसं०) इति ॥७॥

अथ परमात्मनः प्राकृतदेहेन्द्रियाभाववत्वं समाभ्यधिकरहितत्वं शक्तिज्ञानादिगुणवत्वं परमात्मगुणानाञ्च स्वाभाविकत्वं सत्यत्वञ्चाभिधीयते—नेति। तस्य भगवतः श्रीरामस्य कार्यं प्राकृतं शरीरं करणञ्च प्राकृतेन्द्रियञ्च न विद्यते तेन समस्तत्समोऽधिकश्च ततोऽधिकश्चापिश्रुत्यादिषु न दृश्यते। भगवता तुल्योभगवतोऽधिकश्च कश्चिदपि न कुत्रापि नास्तीत्यर्थः। अस्य परमात्मनः श्रीरामस्य परोत्कृष्टस्वरूपेतरा वा स्वाभाविकी स्वभावतो विद्यमाना न तूपाधिवशात् सञ्जातेत्यर्थः। शक्तिरद्भुतकर्मकरणसामर्थ्यम्। श्रूयते सर्वोत्कृष्टश्रुतिप्रमाणसिद्धाऽस्तीत्यर्थः। तदुक्तं श्रीरामभगवत्वे—

''सामर्थ्यमद्भुतस्याथ कर्मणः करणे च यत्।
तद्धि शक्तितया प्रोक्तो गुणोभागवतो महान् ॥'' इति।

'श्रूयते' इत्येवं परमात्मगुणानां श्रुतिसिद्धत्वप्रतिपादनेन तेषां मिथ्यात्वप्रतिपादकाः प्रत्याख्याता वेदितव्याः। केवलं परमात्मनः शक्तिरेव तथाभूताऽपितु तस्येतरेगुणा अपि तथाभूता इत्यतआह—ज्ञानेति। ज्ञानं नाम निखिलदेशकालवस्तुविषयक प्रत्यक्षानुभवलक्षणः परमात्मगुणः। बलं नाम सर्वधारणसामर्थ्यं जगद्रचनायां श्रमाभावो वा। उक्तञ्चोभयमधिकृत्य श्रीरामभगवत्वे—

न तस्य कश्चित् पतिरस्ति लोके न चेशिता नैव च तस्य लिङ्गम्।
सकारणं करणाधिपाधिपो न चास्य कश्चिज्जनिता न चाधिपः ॥९॥

"स्वप्रकाशश्च सर्वेषां सर्वदा भासको विभुः।
गुणश्चालोचकैः प्राज्ञैर्ज्ञानत्वेन प्रकीर्त्तितः॥
सर्वधारणसामर्थ्यं गुणो बलतया मतः।
जगतो रचनायां हि श्रमाभावोऽथवा च सः॥" इति।

ज्ञानं च बलं च ज्ञानबले ज्ञानबलाभ्यां सहिता क्रिया ज्ञानबलक्रिया। अत्र क्रियानाम परमात्मनोजगत्सर्जनादिरूपोव्यापारः। अत्र चकाराद्खिलानां भगवद्गुण क्रियादीनां संग्रहो ज्ञेयः ॥८॥

अथ ब्रह्मपदवाच्यस्य भगवतः श्रीरामस्य सर्वपतित्वादिकमभिधत्ते—न तस्य कश्चिदित्यादिना। लोके कस्मिंश्चिदपि लोके तस्य पूर्वोक्तस्य भगवतः श्रीरामस्य कश्चित् पातीतिपती रक्षकोनास्ति। न च श्रीरामः कस्यचिद् रक्ष्य इत्यर्थः। भगवान् श्रीराम एव सर्वेषां रक्षक इति यावत्। अत एवोक्तं श्रीराममन्त्रप्रदेन श्रीवशिष्ठर्षिगुरुणा पद्मोद्भवेन भगवता श्रीचतुर्मुखेन—"शरण्यं शरणं च त्वामाहुर्दिव्या महर्षयः" इति "त्वं त्रयाणां हि लोकानामादिकर्त्ता स्वयं प्रभुः" इति च (बाल्मी.रा.यु. ११७।१८) श्री पवनकुमारेणाप्युक्तम्—"रामस्य लोकत्रयनायकस्य" इति।वा.रा.सु. ५१।४३) देवर्षिणा श्रीनारदेनाप्युक्तम्—"नारायणं जगन्नाथमभिरामं जगत्पतिम्। कविं पुराणं वागीशं रामं दशरथात्मजम्॥" इति (श्रीरामस्तवराज २८) तस्य पूर्वोक्तस्य श्रीरामस्य कश्चिदीशिता नियामको नैवास्ति। "तमीश्वराणां परमं महेश्वरम्" इतिश्रुत्या तस्य सर्वेश्वराणामपि परममहेश्वरतायाः प्रतिपादितत्वात्। अत एवोक्तं रावणं प्रति चतुर्मुखगुरुणा भगवता श्रीप्रभञ्जनेन—"सर्वलोकेश्वरस्येह कृत्वा विप्रियमीदृशम्। रामस्य राजसिंहस्य दुर्लभं तव जीवितम्" इति। (वा.रा. सुन्दरकाण्ड ५१।३९)। सनत्कुमारसंहितायां श्रीमता देवर्षिणाऽप्युक्तम्—"भर्गं वरेण्यं विश्वेशं रघुनाथं जगद्गुरुम्॥" इति (श्रीरामस्तवराज २९)। अत एवोक्तं श्रीरामार्थरत्नमञ्जूषायां श्रीराम शब्दंव्युत्पादयद्भिरस्मत्परमगुरुभिराचार्यवर्यैः श्रीहर्यानन्दाचार्यैः—"ब्रह्मविष्णुशिवादीनां र वाच्यैश्वर्यशालिनाम्। गमश्चामोऽवितुं यस्य स रामः परिकीर्त्तितः॥९॥ "महाराजाधिराजै रैरम्यते सेव्यते च यः। स्वामी च सर्वलोकानां स रामः परिकीर्त्तितः॥२१॥" इति श्रीराघवेन्द्रमङ्गलमालायामाचार्यवर्यैरप्युक्तम्—भयाभयविधातारः सर्वे यच्छासने स्थिताः। तस्मै हि निखिलेशाय राघवेन्द्राय मङ्गलम्॥६३॥" इति। तस्य पूर्वोक्तस्य श्रीरामस्य (किञ्चित्) लिङ्गमनुभावकः सद्धेतुरपि नैव विद्यते। तस्य

यस्तन्तुनाभ इव तन्तुभिः प्रधानजैः स्वभावतः ।
देव एकः समावृणोति स नो दध्याद् ब्रह्माप्ययम् ॥१०॥

वेदैकवेद्यत्वात् । तथैवोक्तं श्रीसनत्कुमारसंहितायाम्–''वेदान्तवेद्यं कविमीशितारमनादिमध्यान्तमचिन्त्यमाद्यम् । अगोचरं निर्मलमेकरूपं नमामि रामं तमसः परत्वात् ॥ इति । (श्रीरामस्तव० ६१) । एतद्विषयकमधिकं तु शारीरकमीमांसायाः शास्त्रयोनित्वाधिकरणस्यानन्दभाष्ये वक्ष्याम इत्यत्रसंक्षेपः । स श्रीरामः कारणमखिलस्य जगतोऽभिन्नमित्तोपादानकारणम् । 'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमितिश्रुतिप्रामाण्यात् । करणाधिपाधिपः करणानि मन आदीन्येकादशेन्द्रियाणि तेषामधिपोऽधिपतिर्जीवस्तस्याधिपः स्वामी करणानामधिपा इन्द्रियाधिष्ठातारः सुरास्तेषामधिपो वा । अस्य भगवतः श्रीरामस्य कश्चिज्जनिता जनयिता जनक इत्यर्थः । च नास्ति । ''यतो वा इमानि भूतानिजायन्ते'' इत्यादिश्रुतयः '' प्रभवश्चाप्ययश्च त्वमुमेन्द्रो मधुसूदनः'' इत्यादिस्मृतयश्चात्रानुसन्धेयाः। एवमस्य श्रीरामस्य कश्चिदधिपः स्वामी च नास्तीत्यर्थः। सुष्ठूक्तमाचार्यवर्यैः श्रीराघवानन्दाचार्यैः ''विष्णवे विबुधारातिजिष्णवे प्रभविष्णवे । सर्वलोकैकनाथाय राघवेन्द्राय मङ्गलम्'' ॥ इति । (श्रीराघवेन्द्रमङ्गल माला) ॥९॥

जीवानामोक्षापादनायैव भगवतः स्टष्टयायासस्तत्साफल्याय मोक्षं याचते य इति । यः प्रसिद्ध एकः प्रधानो देवः सर्वेश्वररामस्तन्तुभिः स्वशरीरजैः सूत्रैस्तन्तुनाभ ऊर्णनाभिरिव प्रधानाज्जाताः प्रधानजास्तैः 'यस्य पृथिवीशरीरम्' इत्यादि श्रुतिसिद्धस्वशरीरभूतकृतिजैर्महत्तत्वादिभिस्तत्वैः स्वभावतः स्वेच्छया चेतनवर्गमावृणोति सङ्कुचितज्ञानतामापादयति । यथा तन्तुनाभपदवाच्यो जन्तुविशेषः स्वदेहाज्जातैस्तन्तुभिरितस्ततो भ्रमणकर्त्तारं स्वसमीपस्थं जीववर्गमावृणोति तथैव देवपदवाच्य सर्वेश्वररामोपि स्वसङ्कल्पात् सृष्टेः प्राकृतैर्महत्तत्वादिभिस्तत्त्वैः स्वोद्धारमार्गात् परिभ्रष्टान् जीवानावृणोतीत्यर्थः । तदुक्तं भगवद्भिः श्रीश्यामानन्दाचार्यैः—

''शरीरं चेन्द्रियं दत्वा सृष्टिकाले तु राघवः ।
अन्तर्यामितया जीवं स्वीयां सत्तां च रक्षति ॥
सत्सङ्गादिगुणाँश्चाथ समुत्पाद्य हि देहिनि ।
सदाचारेण संयोज्य चापराधान् विसृश्यति ॥
निवार्य भवसम्बन्धमचिरादिपथेन हि ।
स्वधामानुभवौ दत्वा नित्यां सेवां ददाति च ॥'' इति । (नवरत्नी)

स प्रधानजैस्तत्वैर्जीवावरणकर्त्ता देवो रामो नोऽस्माकंब्रह्माप्यय ब्रह्मणि 'इति रामपदेनासौ परं ब्रह्माभिधीयते' इत्यादिश्रुतिबलाद् ब्रह्मपदवाच्ये स्वस्मिन् श्रीरामेऽप्य-

एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा ।
कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च ॥११॥
एको वशी निष्क्रियाणां बहुनामेकं बीजं बहुधा यः करोति ।
तमात्मस्थं येऽनुपश्यन्ति धीरास्तेषां सुखं शाश्वतं नेतरेषाम् ॥१२॥
नित्यो नित्यानांचेतनश्चेतनानामेको बहुनां यो विदधाति कामान् ।
तत् कारणं सांख्ययोगाधिगम्यं ज्ञात्वा देवं मुच्यते सर्वपाशैः ॥१३॥

यमात्यन्तिकं लयम् । भेदाकारेणास्फुरणम् । मोक्षमिति यावत् । दद्यात् सम्पादयेत् । ब्रह्माव्ययमिति पाठे तु अव्ययं नित्यम् भावप्रधाननिर्देशादत्र ब्रह्मपदस्य ब्रह्मत्वमर्थः । जगद्व्यापारादिशून्यत्वविशिष्टगुणाष्टकमितियावत् । तद् दद्यात् प्रयच्छतु । मोक्षं दद्यादित्यर्थः ॥१०॥

अथ मोक्षप्रदातारं देवं भगवन्तं श्रीरामं निरूपयति—एक इत्यादिभिः सर्वभूतेषु निखिलभूतेषु गूढ इतराज्ञातरूपेण विद्यमानः सर्वव्यापी 'अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थित' इति श्रुतेर्विश्वान्तर्बहिर्व्याप्तिशीलोऽत एव सर्वभूतान्तरात्मा सर्वेषां कर्मसु प्रेरयिता । सर्वान्तर्यामीत्यर्थः । कर्माध्यक्षः कर्मणां फलप्रदाने प्रधानः । कर्मणां फलप्रदानेऽन्याध्यक्षताविरहित इत्यर्थः । सर्वेषुभूतेषु नियन्तृरूपेणाधिवसतीति सर्वभूताधिवासः सर्वभूतनियायकः साक्षी 'यः सर्वज्ञः सर्वविदिति श्रुतेः सकलस्य सामान्यविशेषरूपेणसाक्षादेव वेत्ता चेता विश्वनिर्माणकर्त्ता केवलो विश्वनिर्माणकर्तृत्वेऽपि गुणत्रयावश्यत्वेनावाप्तसमस्तकामतया फलाभिसन्धिपूर्वकविश्वनिर्मातृत्वाभावेन चौदासीन्यविशिष्टः कल्याणगुणविशिष्टत्वेऽपि प्राकृतगुणप्रतिभटत्वान्निर्गुण एकोऽद्वितीयः । स्वसमाभ्यधिकरहित इत्यर्थः । देवोद्योतनस्वभावत्वविशिष्टः स्वयंप्रकाशइत्यर्थः भगवान् श्रीरामोऽस्तीतिशेषः ॥११॥

यो बहुनामसंख्यातानां निष्क्रियाणां स्वतन्त्रप्रवृत्यात्मकक्रियारहितानां चेतनाचेतनानामेकः प्रधानो वशी वशकर्त्ता । निजाधीनताऽऽपादक इत्यर्थः । समस्ताश्चेतनाचेतना न स्वतन्त्रा नान्यपरतन्त्राः किन्तु भगवतः श्रीरामस्यैव वशवर्त्तिनः सन्तीति यावत् । एकं बीजं विश्वस्यैकं प्रकृत्याख्यं बीजं यश्च 'बहुस्याम्' इति स्वसङ्कल्पतो बहुधा महत्तत्वादिबहुप्रकारविशिष्टं करोति विदधाति तं समस्तचेतनाचेतनवर्गस्य स्ववश्यताऽऽपादकं प्रकृतेर्महत्तत्वाद्यनेकावस्थावैशिष्ट्यापादकं चात्मस्थं स्वान्तर्यामिणं भगवन्तं श्रीरामं ये धीरा विवेकशालिनः पुरुषा अनुपश्यन्त्यवगच्छन्ति तेषामेव शाश्वतं सुखं शाश्वतसुखात्मकं मोक्षो भवतीतिशेषः । नेतरेषां भगवज्ज्ञानविरहितानां जनानां तु मोक्षो नैव भवतीति ध्येयम् ॥१२॥

न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः।
तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति ॥१४॥
एको हंसो भुवनस्यास्य मध्ये स एवाग्निः सलिले सन्निविष्टः।
तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय ॥१५॥

अथ निखिलाभिलषितपदार्थप्रदजगत्कारणलक्षणदेवपदवाच्यभगवच्छ्रीरामज्ञानान्मुक्तिर्भवतीत्येतदभिदधाति—नित्य इति। बहुनां बहुसंख्याकानां नित्यानामुत्पत्तिविनाशशून्यानां मध्ये नित्योऽत्यन्तनित्यश्चेतनानां बहुनां बहुसंख्याविशिष्टानां चैतन्यपदवाच्यज्ञानाश्रयाणां मध्ये चेतनः परमचेतन एक एव यः कामानपेक्ष्यमाणानर्थान् विदधाति सम्पादयति तत् कारणं जगतोऽभिन्ननिमित्तोपादानात्मको हेतुः सांख्ययोगाधिगम्यं ज्ञानयोगकर्मयोगविज्ञेयं देवं देवपदाभिधेयं भगवन्तं श्रीरामं ज्ञात्वा सर्वे च ते पाशाः सर्वपाशास्तैरखिलैः पाशवद्बन्धनकारकैः कर्मभिर्मुच्यते मुक्तो भवति। अत्र यद्यप्य'जो नित्यः शाश्वतोऽयं पुराणो' इतिभगवद्वचनबलाद् जीवानां नित्यत्वमेवास्त्यत एवोक्तं श्रौतप्रमेयचन्द्रिकायामाचार्यचक्रवर्त्तिभिः श्रीश्रियानन्दाचार्यैः—''पयः पानानुसन्धानाच्चेतनत्वात् तथैव च। यस्यात्मेतिश्रुतेश्चाथ नानात्वव्यपदेशतः॥ नित्यो देहातिरिक्तश्च देहश्चांशः परात्मनः।'' इति। तथापि दुराग्रहवशात् केचिदिह नित्यो नित्यानामित्यत्र नित्योऽनित्यानामिति पाठमङ्गीकुर्वन्ति। तथापाठेऽपि धर्मभूतज्ञानसंकोचयोगाच्चेतनानामनित्यत्वमिति नास्त्यत्र कश्चिद्दोषावसर इति सुधियोऽभिदधति ॥१३॥

अथ स्वतो भासमानस्य भगवतः सर्वभासकत्वम्प्रतिपादयति—न तत्रेति। तत्र प्रस्तुते जगत्कारणे परब्रह्मणि भगवति श्रीरामे सूर्यो सहस्रकिरणमाली भगवान् भास्करो न भाति प्रकाशं न विदधाति, चन्द्रश्च तारकाणि चैषां समाहारश्चन्द्रतारकशशितारकचक्रं न भाति प्रकाशं न करोति, इमा विद्युतो न भान्ति प्रकाशं न कुर्वन्ति। सर्वेषां तेजःशालिनां भास्करादीनां तेजांसि ब्रह्मतेजसाऽभिभूतानीत्यर्थः। कुतोऽयमग्निर्भातीतिशेषः। तर्हि पूर्वोक्तभास्कराद्यपेक्षयाऽत्यन्ताल्पतेजः शीलस्यानलस्य वराकस्य तेजसो ब्रह्मतेजसाऽभिभवे किमुवक्तव्यमित्यर्थः। तर्हि सर्वेषां भानं कुत इत्याशङ्कायामाह—तमेवेति। तमेव भगवन्तं श्रीरामं भान्तमनुपश्चात् सर्वं भाति। तस्य भगवतः श्रीरामस्य भासा तेजसैवेदं सर्वं विभाति प्रकाशत इत्यर्थः। आदित्यादीनां तेजांसि भगवदीयान्येव न स्वीयानीतिभावः। तदुक्तं गीतायाम्—''यदादित्यगतं तेजो जगद् भासयतेऽखिलम्। यच्चन्द्र मसि यच्चाग्नौ तत्तेजो विद्धि मामकम्'' इति। भगवतस्तेजसोऽभावे सर्वमिदं तिमिराच्छन्नमेव स्यादित्येतत् ॥१४॥

स विश्वकृद् विश्वविदात्मयोनिर्ज्ञः कालकालो गुणी सर्वविद्यः ।
प्रधानक्षेत्रज्ञपतिर्गुणेशः संसारमोक्षस्थितिबन्धहेतुः ॥१६॥
स तन्मयो ह्यमृत ईशसंस्थो ज्ञः सर्वगो भुवनस्यास्य गोप्ता ।
य ईशेऽस्य जगतो नित्यमेव नान्यो हेतुर्विद्यते ईशनाय ॥१७॥
यो ब्रह्माणं विदधाति पूर्वं यो वै वेदाँश्च प्रहिणोति तस्मै ।
तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये ॥१८॥

अथ भगवत्प्रापकं भगवदुपासनमेवेत्येतदभिधत्ते—एक इति । अस्य भुवनस्य चेतनाचेतनलक्षणस्य जगतो मध्य एको मुख्यो हंसः पक्षिणां मध्ये हंस इव स्थित अग्रे नयतीत्यग्निरग्रनेता मोक्षदाता संसारबन्धदाहको वा सलिले समुद्राम्भसि सन्निविष्टः तमेव सर्वेश्वरं श्रीरामं विदित्वोपास्यातिमृत्युंमृत्योरतिक्रममेति प्राप्नोति । मृत्युमतिक्रम्य परमपदमवाप्नोतीत्यर्थः । ईयत इत्ययनं प्राप्यं तस्मा अयनाय भगवत्प्राप्तये भगवत्प्राप्तिहेतवे भगवत्प्रसादाय वेत्यर्थः । अन्य भगवदुपासनं विना पन्था अन्योऽध्वा । उपाय इत्यर्थः । न विद्यते नवर्त्तते "रामो ब्रह्म परात्परं श्रुतिमतं भक्त्यैव निःश्रेयसमित्याचार्योक्तेः ॥१५॥

अथ भगवतो विश्वकर्तृत्वादिकमापादयति स विश्वकृदिति । स प्रस्तुतो भगवान् श्रीरामो विश्वं करोतीति विश्वकृत् सर्वकारकः सर्वहारकश्च, विश्वं विन्दतीति विश्ववित् सर्वं प्राप्तः, आत्मा योनिः स्थानं यस्य स आत्मयोनिर्जीवान्तर्यामी, जानातीतिज्ञो-विभुज्ञानाश्रयः सर्वज्ञ इत्यर्थः, कालस्यापिकालः कालनियन्तेत्यर्थः, प्रशस्ता गुणाः सन्त्यस्येतिगुणी दिव्यानन्तगुणविशिष्टः सर्वा विद्या अस्य सन्तीति सर्वविद्यःसर्वविद्याप्रवर्त्तकः, प्रधानं च क्षेत्रज्ञश्चेति प्रधानक्षेत्रज्ञौ तयोः पतिः प्रधानक्षेत्रज्ञपतिः प्रकृतिपुरुषस्वामी, गुणानामीशो गुणेशो ज्ञानादिगुणपरिपूर्णः सत्वादिगुणनियन्ता वा, संसारमोक्षस्थितिबन्धहेतुः संसारान्मोक्षे संसारस्थित्यात्मके बन्धे च हेतुःकारणमित्यर्थः ॥१६॥

स तन्मय इति । स पूर्वोक्तो भगवान् श्रीरामः तन्मयस्तदात्मको हि, अमृतोऽसंसारी, ईशसंस्थ ईशनसंस्थितिकः, ज्ञः सर्वज्ञः, सर्वगः सर्वगतः, अस्य चिदचिल्लक्षणस्य भुवनस्य गोप्ता रक्षकः, अस्य जगतो नित्यमीशे नियमनं करोति यश्च नित्यमेतज्जगन्नियन्तेत्यर्थः, नित्यमित्यनेन मोक्षेपीश्वरस्येशानव्यापारो भवतीत्यर्थो लभ्यते । ईशानायान्यो हेतुर्न विद्यते । भगवतो जगदीशितृत्वमन्यहेतुकं न भवतीत्यर्थः ॥१७॥

अथ भगवतो ममुक्षुशरणत्वमाह—य इति । यो लोके शास्त्रे च जगत्कारणत्वेन प्रसिद्धो भगवान् श्रीरामः पूर्वंसृष्टयादौ "भवान्नारायणोदेवः" इतिवचनबणात् स्वस्य नारायणस्वरूपस्य नाभिकमले ब्रह्माणं चतुर्मुखं विदधात्युत्पादयति यो वै यश्चवै तस्मै स्वेनोत्पादि-

निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम् ।
अमृतस्य परं सेतुं दग्धेन्धनमिवानलम् ॥१९॥
यदा चर्मवदाकाशं वेष्टयिष्यन्ति मानवाः ।
तदा देवमविज्ञाय दुःखस्यान्तो भविष्यति ॥२०॥
तपः प्रभावाद् देवप्रसादाच्च ब्रह्म ह श्वेताश्वतरोऽथ विद्वान् ।
अत्याश्रमिभ्यः परमं पवित्रं प्रोवाच सम्यगृषिसंघजुष्टम् ॥२१॥

ताय विधये वेदांश्च सर्वविद्यानिधानरूपान् वेदांश्च प्रहिणोति प्रेषयतिप्रददातीत्यर्थः । उक्तञ्चैतद् वशिष्ठसंहितायां चतुराननस्यमानसैः पुत्रैः श्रीराममन्त्रप्रदाचार्यैर्महर्षिवशिष्ठैः
"सृष्ट्यादौ च सिसृक्षुः श्रीरामो विधिं विधाय हि ।
सृष्टये प्रेषयामास वेदं ज्ञानमहानिधिम् ॥" इति ।

अहं तं ह्यात्मबुद्धिप्रकाशं स्वविषयकबुद्धिप्रकाशकं देवं ब्रह्मेशानादिसर्वपूज्यं भगवन्तं श्रीरामं शरणं प्रपद्ये "सकृदेव प्रपन्नाय तवास्मीति य याचते । अभयं सर्वभूतेभ्यो ददाम्येतद् व्रतं मम ॥" इति भगवच्छ्रीरामोक्त्या भगवच्छ्रीरामप्रपत्तेरेव सर्वाभयनिदानत्वात् सर्वेश्वरश्रीराममेव शरणमहं प्रपद्ये । उक्ता च सकृद्रामप्रपत्त्यैव परधामावाप्तिर्जगद्गुरुभिः श्रीचिदानन्दाचार्यैर्न्यासकलानिधौ–
"नावाप्यते परं धाम तपोयोगसमाधिभिः ।
सकृद्रामप्रपत्त्यैव प्राणिभिः प्राप्यते हि तत् ॥" इति ।

ततो भगवच्छ्रीरामप्रपत्तिरेव मोक्षार्थं विधेया मुमुक्षुभिरिति भावः ॥१८॥

अथ भक्त्यभावे प्रपत्तिवद् ब्रह्मज्ञानाभावेऽपिकिं किञ्चिदुपायान्तरं स्यान्मुक्तिसाधकमित्याशङ्कामपाकरोति निष्कलमित्यादिमन्त्रद्वयेन । यदा मानवाश्चर्मवदाकाशं नभो वेष्टयिष्यन्ति तदा निष्कलमवयवरहितं निष्क्रियं कर्तृत्वाभिमानशून्यत्वादवाप्तसमस्तकामत्वेन प्रयोजनरहितत्वात् संकल्पमात्रेण सर्वविधायकत्वाद् वा क्रियारहितं शान्तं अशनायाद्यूर्मिषट्कशून्यं निरवद्यं स्वाश्रितपराङ्मुखत्वादिदोषहीनं निरञ्जनं निरवलेपममृतस्य मोक्षस्य परं सेतुं मर्यादास्वरूपं चरमं प्राप्यमित्यर्थः । दग्धेन्धनानलमिव स्वयम्प्रकाशमानं देवं सर्वपूज्यं भगवन्तं श्रीराममविज्ञायाननुभूय दुःखस्यान्तो विनाशो भविष्यति । परब्रह्मश्रीरामज्ञानाभावदशायामाकाशवेष्टनस्यासम्भावनेव मोक्षस्याप्यसम्भावनैवास्तीतिभावः ॥१९॥२०॥

अथोक्तस्य मोक्षहेतुभूतस्य ब्रह्मज्ञानस्याधिकारिणमधिकृत्योपदिशति–तपःप्रभावादिति । तपसः कृच्छ्रचान्द्रायणादेः * प्रभावाद् देवस्यसर्वाराध्यस्य भगवतः श्रीरामस्य

* आदिनाऽऽश्रमविहितधर्मात्मकस्येन्द्रियैकाग्र्यस्वरूपस्य च ग्रहणम् ।

वेदान्ते परमं गुह्यं पुराकल्पे प्रचोदितम् ।
नाप्रशान्ताय दातव्यं नापुत्रायाशिष्याय वै पुनः ॥२२॥
यस्य देवे पराभक्तिर्यथा देवे तथा गुरौ ।
तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥
प्रकाशन्ते महात्मनः ॥२३॥

इति श्वेताश्वतरोपनिषदि षष्ठोऽध्यायः॥६॥

卐 समाप्ता श्वेताश्वतरोपनिषत् 卐

प्रसादात् परानुग्रहाच्च यद्वैवार्थकोऽत्र चकारः । तथा च तपःप्रभावाद् यो देव प्रसादस्तस्मादेवेत्यर्थः । विद्वान् समापन्नब्रह्मविज्ञानः श्वेताश्वतर एतन्नायकः कश्चिद् ऋषिरथ ब्रह्मज्ञानावाप्त्यनन्तरमत्याश्रमिभ्योऽतिरत्रपूजार्थकस्तस्मात् पूज्याश्रमिभ्यः । न चात्याश्रमिभ्य इत्यस्याश्रमशून्येभ्य इत्यर्थःस्यादिति वाच्यमाश्रमरहितस्य नरस्य कृच्छ्रेण शुद्धेरुक्तत्वात् । तथा हि—"न चानाश्रमिणा भाव्यं नरेण हितमिच्छता । अनाश्रमी यतश्चात्र नरः कृच्छ्रेण सुध्यति ॥" (वशिष्ठसंहिता) अन्यत्रापि—"अनाश्रमी न तिष्ठेत्तु दिनमेकमपि द्विजः ।" इति । ऋषिसंघैर्वशिष्ठागस्त्यपराशरविश्वामित्रभरद्वाजादिमहर्षिसमूहैः सम्यग् जुष्टं सेवितं परममत्युत्कर्षशालिपवित्रं स्वभावतोऽपास्तदोषसंघत्वान्निरतिशयशुद्धिसमन्वितं ब्रह्म स्वरूपेण गुणेन देहेन चात्यन्तबृहत्तामापन्नं "रमन्ते योगिनोऽनन्ते नित्यानन्दे चिदात्मनि । इतिरामपदेनासौ परब्रह्माभिधीयते" "भवान्नारायणो देवः श्रीमांश्चक्रायुधः प्रभुः । एकशृङ्गोवराहस्त्वं भूतभव्यसपत्नजित् ॥ अक्षरं ब्रह्मसत्यं च मध्ये चान्ते च राघव" इत्यादिश्रुतिस्मृतिप्रमाणाद् ब्रह्मपदाभिधेयं भगवन्तं श्रीरामं प्रोवाचोक्तवान् ह इति प्रसिद्धौ ॥२१॥

वेदान्त इत्येकवचनं जातौ । वेदान्तेषूपनिषत्सु परममत्यन्तं गुह्यं रहस्यत्वेनगोपनीयं पुराकल्पे प्रचोदितमुपरिष्टमेतद् विज्ञानं अप्रशान्ताय शान्तिशून्यायापुत्राय पुत्ररहितायाशिष्याय शिष्यभावविरहिताय च नदातव्यम् । अतिरहस्यात्मकमेतद् ब्रह्मज्ञानं प्रशान्ताय पुत्राय शिष्यायचैवोपदेष्टव्यं नान्यस्मा इत्यर्थः ॥२२॥

अथोपदिष्टरहस्यप्रकाशहेतुतया भगवद्भक्तिं गुरुभक्तिं चोपदिशति—यस्येति । यस्य जिज्ञासोर्देवे ब्रह्मे ज्ञानादिसकलाराध्ये परब्रह्मणि भगवति श्रीरामे परोत्कृष्टा भक्तिर्भवेद् यथा देवे तथागुरौ भक्तिर्भवेत् तस्य महात्मनो देवभक्तितुल्यगुरुभक्तिविशिष्टस्य पुरुषस्यैते कथिताः श्वेताश्वतरोपदिष्टा अर्थाः पदार्थाः प्रकाशन्ते । देवप्रसादगुरुप्रसादद्वयेनावभासन्ते नान्यस्येत्यर्थः समादरं संसूचयति द्विरुक्तिः ॥२३॥

इति श्वेताश्वतरोपनिषदो भगवच्छ्रीरामानन्दाचार्यप्रणीतानन्दभाष्ये षष्ठोऽध्यायः॥६॥卐